# ॥ શ્રીગણેશ ગીતા ॥

.. shrIGanesha Gita ..

sanskritdocuments.org

August 2, 2016

# .. shrIGanesha Gita ..

# ॥ શ્રીગણેશ ગીતા ॥

## Document Information

Text title : Ganesha Gita

File name : ganeshagita.itx

Category : gItA

Location : doc_giitaa

Author : Vyasa(by tradition,author of Ganesha Purana)

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Sunder Hattangadi sunderh at hotmail.com

Proofread by : Sunder Hattangadi sunderh at hotmail.com

Description-comments : portion of Ganesha Purana

Latest update : July 4, 2008

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

sanskritdocuments.org

# ॥ શ્રીગણેશ ગીતા ॥


| ક્રમાંક | અધ્યાય નામ | શ્લોકસંખ્યા ૪૧૪ |
|---|---|---|
| ૧ | સાંખ્યસારાર્થયોગ | ૬૯ |
| ૨ | કર્મયોગ | ૪૩ |
| ૩ | વિજ્ઞાનપ્રતિપાદન | ૫૦ |
| ૪ | વૈધસંન્યાસયોગ | ૩૭ |
| ૫ | યોગાવૃત્તિપ્રશંસન | ૨૭ |
| ૬ | બુદ્ધિયોગ | ૨૧ |
| ૭ | ઉપાસનાયોગ | ૨૫ |
| ૮ | વિશ્વરૂપદર્શન | ૨૬ |
| ૯ | ક્ષેત્રજ્ઞાતૃજ્ઞેયવિવેકયોગ | ૪૧ |
| ૧૦ | ઉપદેશયોગ | ૨૩ |
| ૧૧ | ત્રિવિધવસ્તુવિવેકનિરૂપણ | ૫૨ |


॥ ૐ નમઃ શ્રીગણેશાય ॥

॥ અથ શ્રીમદ્ગણેશગીતા પ્રારભ્યતે ॥

૧
॥ પ્રથમોઽધ્યાયઃ ॥

॥ સાઙ્ખ્યસારાર્થ યોગઃ ॥

ક ઉવાચ -
એવમેવ પુરા પૃષ્ટઃ શૌનકેન મહાત્મના ।
સ સૂતઃ કથયામાસ ગીતાં વ્યાસમુખાચ્છ્રુતામ્ ॥૧ ॥

સૂત ઉવાચ -
અષ્ટાદશપુરાણોક્તમમૃતં પ્રાશિતં ત્વયા ।
તતોઽતિરસવત્પાતુમિચ્છામ્યમૃતમુત્તમમ્ ॥૨ ॥

યેનામૃતમયો ભૂત્વા પુમાન્બ્રહ્મામૃતં યતઃ ।
યોગામૃતં મહાભાગ તન્મે કરુણયા વદ ॥૩ ॥

વ્યાસ ઉવાચ -
અથ ગીતાં પ્રવક્ષ્યામિ યોગમાર્ગપ્રકાશિનીમ્ ।
નિયુક્તા પૃચ્છતે સૂત રાજ્ઞે ગજમુખેન યા ॥૪ ॥

વરેણ્ય ઉવાચ -
વિઘ્નેશ્વર મહાબાહો સર્વવિદ્યાવિશારદ ।
સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞ યોગં મે વક્તુમર્હસિ ॥૫ ॥

શ્રીગજાનન ઉવાચ -
સમ્યગ્વ્યવસિતા રાજન્મતિસ્તેઽનુગ્રહાન્મમ ।
શૃણુ ગીતાં પ્રવક્ષ્યામિ યોગામૃતમયીં નૃપ ॥૬ ॥

ન યોગં યોગમિત્યાહુર્યોગો યોગો ન ચ શ્રિયઃ ।
ન યોગો વિષયૈર્યોગો ન ચ માત્રાદિભિસ્તદા ॥૭ ॥

યોગો યઃ પિતૃમાત્રાદેર્ન સ યોગો નરાધિપ ।
યો યોગો બન્ધુપુત્રાદેર્યશ્ચાષ્ટભૂતિભિઃ સહ ॥૮ ॥

ન સ યોગસ્ત્રિયા યોગો જગદદ્ભુતરૂપયા ।
રાજ્યયોગશ્ચ નો યોગો ન યોગો ગજવાજિભિઃ ॥૯ ॥

યોગો નેન્દ્રપદસ્યાપિ યોગો યોગાર્થિનઃ પ્રિયઃ ।
યોગો યઃ સત્યલોકસ્ય ન સ યોગો મતો મમ ॥૧૦ ॥

શૈવસ્ય યોગો નો યોગો વૈષ્ણવસ્ય પદસ્ય યઃ ।
ન યોગો ભૂપ સૂર્યત્વં ચન્દ્રત્વં ન કુબેરતા ॥૧૧ ॥

નાનિલત્વં નાનલત્વં નામરત્વં ન કાલતા ।
ન વારુણ્યં ન નૈરૃત્યં યોગો ન સાર્વભૌમતા ॥૧૨ ॥

યોગં નાનાવિધં ભૂપ યુઞ્જન્તિ જ્ઞાનિનસ્તતમ્ ।
ભવન્તિ વિતૃષા લોકે જિતાહારા વિરેતસઃ ॥૧૩ ॥

પાવયન્ત્યખિલાન્લોકાન્વશીકૃતજગત્ત્રયાઃ ।
કરુણાપૂર્ણહૃદયા બોધયન્ત્યપિ કાંશ્ચન ॥૧૪ ॥

જીવન્મુક્તા હ્રદે મગ્નાઃ પરમાનન્દરૂપિણિ ।
નિમીલ્યાક્ષીણિ પશ્યન્તઃ પરં બ્રહ્મ હૃદિ સ્થિતમ્ ॥૧૫ ॥

ધ્યાયન્તઃ પરમં બ્રહ્મ ચિત્તે યોગવશીકૃતમ્ ।
ભૂતાનિ સ્વાત્મના તુલ્યં સર્વાણિ ગણયન્તિ તે ॥૧૬ ॥

યેન કેનચિદાચ્છિન્ના યેન કેનચિદાહૃતાઃ ।
યેન કેનચિદાકૃષ્ટા યેન કેનચિદાશ્રિતાઃ ॥૧૭ ॥

કરુણાપૂર્ણહૃદયા ભ્રમન્તિ ધરણીતલે ।
અનુગ્રહાય લોકાનાં જિતક્રોધા જિતેન્દ્રિયાઃ ॥૧૮ ॥

દેહમાત્રભૃતો ભૂપ સમલોષ્ટાશ્મકાઞ્ચનાઃ ।
એતાદૃશા મહાભાગ્યાઃ સ્યુશ્ચક્ષુર્ગોચરાઃ પ્રિય ॥૧૯ ॥

તમિદાનીમહં વક્ષ્યે શૃણુ યોગમનુત્તમમ્ ।
શ્રુત્વા યં મુચ્યતે જન્તુઃ પાપેભ્યો ભવસાગરાત્ ॥૨૦ ॥

શિવે વિષ્ણૌ ચ શક્તૌ ચ સૂર્યે મયિ નરાધિપ ।
યાઽભેદબુદ્ધિર્યોગઃ સ સમ્યગ્યોગો મતો મમ ॥૨૧ ॥

અહમેવ જગદ્યસ્માત્સૃજામિ પાલયામિ ચ ।
કૃત્વા નાનાવિધં વેષં સંહરામિ સ્વલીલયા ॥૨૨ ॥

અહમેવ મહાવિષ્ણુરહમેવ સદાશિવઃ ।
અહમેવ મહાશક્તિરહમેવાર્યમા પ્રિય ॥૨૩ ॥

અહમેકો નૃણાં નાથો જાતઃ પઞ્ચવિધઃ પુરા ।
અજ્ઞાનાન્મા ન જાનન્તિ જગત્કારણકારણમ્ ॥૨૪ ॥

મત્તોઽગ્નિરાપો ધરણી મત્ત આકાશમારુતૌ ।
બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ લોકપાલા દિશો દશ ॥૨૫ ॥

વસવો મનવો ગાવો મનવઃ પશવોઽપિ ચ ।
સરિતઃ સાગરા યક્ષા વૃક્ષાઃ પક્ષિગણા અપિ ॥૨૬ ॥

તથૈકવિંશતિઃ સ્વર્ગા નાગાઃ સપ્ત વનાનિ ચ ।
મનુષ્યાઃ પર્વતાઃ સાધ્યાઃ સિદ્ધા રક્ષોગણાસ્તથા ॥૨૭ ॥

અહં સાક્ષી જગચ્ચક્ષુરલિપ્તઃ સર્વકર્મભિઃ ।
અવિકારોઽપ્રમેયોઽહમવ્યક્તો વિશ્વગોઽવ્યયઃ ॥૨૮ ॥

અહમેવ પરં બ્રહ્માવ્યયાનન્દાત્મકં નૃપ ।
મોહયત્યખિલાન્માયા શ્રેષ્ઠાન્મમ નરાનમૂન્ ॥૨૯ ॥

સર્વદા ષડ્વિકારેષુ તાનિયં યોજયેત્ ભૃશમ્ ।
હિત્વાજાપટલં જન્તુરનેકૈર્જન્મભિઃ શનૈઃ ॥૩૦ ॥

વિરજ્ય વિન્દતિ બ્રહ્મ વિષયેષુ સુબોધતઃ ।
અચ્છેદ્યં શસ્ત્રસઙ્ઘાતૈરદાહ્યમનલેન ચ ॥૩૧ ॥

અક્લેદ્યં ભૂપ ભુવનૈરશોષ્યં મારુતેન ચ ।
અવધ્યં વધ્યમાનેઽપિ શરીરેઽસ્મિન્નરાધિપ ॥૩૨ ॥

યામિમાં પુષ્પિતાં વાચં પ્રશંસન્તિ શ્રુતીરિતામ્ ।
ત્રયીવાદરતા મૂઢાસ્તતોઽન્યન્મન્વતેઽપિ ન ॥૩૩ ॥

કુર્વન્તિ સતતં કર્મ જન્મમૃત્યુફલપ્રદમ્ ।
સ્વર્ગૈશ્વર્યરતા ધ્વસ્તચેતના ભોગબુદ્ધયઃ ॥ ૩૪ ॥

સમ્પાદયન્તિ તે ભૂપ સ્વાત્મના નિજબન્ધનમ્ ।
સંસારચક્રં યુઞ્જન્તિ જડાઃ કર્મપરા નરાઃ ॥ ૩૫ ॥

યસ્ય યદ્વિહિતં કર્મ તત્કર્તવ્યં મદર્પણમ્ ।
તતોઽસ્ય કર્મબીજાનામુચ્છિન્નાઃ સ્યુર્મહાઙ્કુરાઃ ॥ ૩૬ ॥

ચિત્તશુદ્ધિશ્ચ મહતી વિજ્ઞાનસાધિકા ભવેત્ ।
વિજ્ઞાનેન હિ વિજ્ઞાતં પરં બ્રહ્મ મુનીશ્વરૈઃ ॥ ૩૭ ॥

તસ્માત્કર્માણિ કુર્વીત બુદ્ધિયુક્તો નરાધિપ ।
ન ત્વકર્મા ભવેત્કોઽપિ સ્વધર્મત્યાગવાંસ્તથા ॥ ૩૮ ॥

જહાતિ યદિ કર્માણિ તતઃ સિદ્ધિં ન વિન્દતિ ।
આદૌ જ્ઞાને નાધિકારઃ કર્મણ્યેવ સ યુજ્યતે ॥ ૩૯ ॥

કર્મણા શુદ્ધહૃદયોઽભેદબુદ્ધિમુપૈષ્યતિ ।
સ ચ યોગઃ સમાખ્યાતોઽમૃતત્વાય કલ્પતે ॥ ૪૦ ॥

યોગમન્યં પ્રવક્ષ્યામિ શૃણુ ભૂપ તમુત્તમમ્ ।
પશૌ પુત્રે તથા મિત્રે શત્રૌ બન્ધૌ સુહૃજ્જને ॥ ૪૧ ॥

બહિર્દૃષ્ટ્યા ચ સમયા હૃત્સ્થયાલોકયેત્પુમાન્ ।
સુખે દુઃખે તથાઽમર્ષે હર્ષે ભીતૌ સમો ભવેત્ ॥ ૪૨ ॥

રોગાપ્તૌ ચૈવ ભોગાપ્તૌ જયે વા વિજયેઽપિ ચ ।
શ્રિયોઽયોગે ચ યોગે ચ લાભાલાભે મૃતાવપિ ॥ ૪૩ ॥

સમો માં વસ્તુજાતેષુ પશ્યન્નન્તર્બહિઃસ્થિતમ્ ।
સૂર્યે સોમે જલે વહ્નૌ શિવે શક્તૌ તથાનિલે ॥ ૪૪ ॥

દ્વિજે હૃદિ મહાનદ્યાં તીર્થે ક્ષેત્રેઽઘનાશિનિ ।
વિષ્ણૌ ચ સર્વદેવેષુ તથા યક્ષોરગેષુ ચ ॥ ૪૫ ॥

ગન્ધર્વેષુ મનુષ્યેષુ તથા તિર્યગ્ભવેષુ ચ ।
સતતં માં હિ યઃ પશ્યેત્સોઽયં યોગવિદુચ્યતે ॥ ૪૬ ॥

સમ્પરાહૃત્ય સ્વાર્થેભ્ય ઇન્દ્રિયાણિ વિવેકતઃ ।
સર્વત્ર સમતાબુદ્ધિઃ સ યોગો ભૂપ મે મતઃ ॥ ૪૭ ॥

આત્માનાત્મવિવેકેન યા બુદ્ધિર્દૈવયોગતઃ ।
સ્વધર્માસક્તચિત્તસ્ય તદ્યોગો યોગ ઉચ્યતે ॥ ૪૮ ॥

ધર્માધરમૌ જહાતીહ તયા યુક્ત ઉભાવપિ ।
અતો યોગાય યુઞ્જીત યોગો વૈધેષુ કૌશલમ્ ॥૪૯ ॥

ધર્માધર્મફલે ત્યક્ત્વા મનીષી વિજિતેન્દ્રિયઃ ।
જન્મબન્ધવિનિર્મુક્તઃ સ્થાનં સંયાત્યનામયમ્ ॥૫૦ ॥

યદા હ્યજ્ઞાનકાલુષ્યં જન્તોર્બુદ્ધિઃ ક્રમિષ્યતિ ।
તદાસૌ યાતિ વૈરાગ્યં વેદવાક્યાદિષુ ક્રમાત્ ॥૫૧ ॥

ત્રયીવિપ્રતિપન્નસ્ય સ્થાણુત્વં યાસ્યતે યદા ।
પરાત્મન્યચલા બુદ્ધિસ્તદાસૌ યોગમાપ્નુયાત્ ॥૫૨ ॥

માનસાનખિલાન્કામાન્યદા ધીમાંસ્ત્યજેત્પ્રિય ।
સ્વાત્મનિ સ્વેન સન્તુષ્ટઃ સ્થિરબુદ્ધિસ્તદોચ્યતે ॥૫૩ ॥

વિતૃષ્ણઃ સર્વસૌખ્યેષુ નોદ્વિગ્નો દુઃખસઙ્ગમે ।
ગતસાધ્વસરુડ્રાગઃ સ્થિરબુદ્ધિસ્તદોચ્યતે ॥૫૪ ॥

યથાઽયં કમઠોઽઙ્ગાનિ સંકોચયતિ સર્વતઃ ।
વિષયેભ્યસ્તથા ખાનિ સંકર્ષેદ્યોગતત્પરઃ ॥૫૫ ॥

વ્યાવર્તન્તેઽસ્ય વિષયાસ્ત્યક્તાહારસ્ય વર્ષ્મિણઃ ।
વિના રાગં ચ રાગોઽપિ દૃષ્ટ્વા બ્રહ્મ વિનશ્યતિ ॥૫૬ ॥

વિપશ્ચિદ્યતતે ભૂપ સ્થિતિમાસ્થાય યોગિનઃ ।
મન્થયિત્વેન્દ્રિયાણ્યસ્ય હરન્તિ બલતો મનઃ ॥૫૭ ॥

યુક્તસ્તાનિ વશે કૃત્વા સર્વદા મત્પરો ભવેત્ ।
સંયતાનીન્દ્રિયાણીહ યસ્યાસૌ કૃતધીર્મતઃ ॥૫૮ ॥

ચિન્તયાનસ્ય વિષયાન્સંગસ્તેષૂપજાયતે ।
કામઃ સંજાયતે તસ્માત્તતઃ ક્રોધોઽભિવર્તતે ॥૫૯ ॥

ક્રોધાદજ્ઞાનસંભૂતિર્વિભ્રમસ્તુ તતઃ સ્મૃતેઃ ।
ભ્રંશાત્સ્મૃતેર્મતેર્ધ્વંસસ્તદ્ધ્વંસાત્સોઽપિ નશ્યતિ ॥૬૦ ॥

વિના દ્વેષં ચ રાગં ચ ગોચરાન્યસ્તુ ખૈશ્ચરેત્ ।
સ્વાધીનહૃદયો વશ્યૈઃ સંતોષં સ સમૃચ્છતિ ॥૬૧ ॥

ત્રિવિધસ્યાપિ દુઃખસ્ય સંતોષે વિલયો ભવેત્ ।
પ્રજ્ઞયા સંસ્થિતશ્ચાયં પ્રસન્નહૃદયો ભવેત્ ॥૬૨ ॥

વિના પ્રસાદં ન મતિર્વિના મત્યા ન ભાવના ।
વિના તાં ન શમો ભૂપ વિના તેન કુતઃ સુખમ્ ॥૬૩ ॥

ઇન્દ્રિયાશ્વાન્વિચરતો વિષયાનનુ વર્તતે ।
યન્મનસ્તન્મતિં હન્યાદપ્સુ નાવં મરુદ્યથા ॥૬૪ ॥

યા રાત્રિઃ સર્વભૂતાનાં તસ્યાં નિદ્રાતિ નૈવ સઃ ।
ન સ્વપન્તીહ તે યત્ર સા રાત્રિસ્તસ્ય ભૂમિપ ॥૬૫ ॥

સરિતાં પતિમાયાન્તિ વનાનિ સર્વતો યથા ।
આયાન્તિ યં તથા કામા ન સ શાન્તિં ક્વચિલ્લભેત્ ॥૬૬ ॥

અતસ્તાનીહ સંરુધ્ય સર્વતઃ ખાનિ માનવઃ ।
સ્વસ્વાર્થેભ્યઃ પ્રધાવન્તિ બુદ્ધિરસ્ય સ્થિરા તદા ॥૬૭ ॥

મમતાહંકૃતી ત્યક્ત્વા સર્વાન્કામાંશ્ચ યસ્ત્યજેત્ ।
નિત્યં જ્ઞાનરતો ભૂત્વા જ્ઞાનાન્મુક્તિં સ યાસ્યતિ ॥૬૮ ॥

એવં બ્રહ્મધિયં ભૂપ યો વિજાનાતિ દૈવતઃ ।
તુર્યામવસ્થાં પ્રાપ્યાપિ જીવન્મુક્તિં પ્રયાસ્યતિ ॥૬૯ ॥

ઇતિ શ્રીમદ્ગણેશગીતાસૂપનિષદર્થગર્ભાસુ
યોગામૃતાર્થશાસ્ત્રે
શ્રીગણેશપુરાણે ઉત્તરખણ્ડે ગજાનનવરેણ્યસંવાદે
સાંખ્યસારાર્થયોગો નામ પ્રથમોઽધ્યાયઃ ॥

## ૨
## ॥ દ્વિતીયોઽધ્યાયઃ ॥

### ॥ કર્મયોગઃ ॥

વરેણ્ય ઉવાચ -
જ્ઞાનનિષ્ઠા કર્મનિષ્ઠા દ્વયં પ્રોક્તં ત્વયા વિભો ।
અવધાર્ય વદૈકં મે નિઃશ્રેયસકરં નુ કિમ્ ॥૧ ॥

ગજાનન ઉવાચ -
અસ્મિંશ્ચરાચરે સ્થિત્યૌ પુરોક્તે દ્વે મયા પ્રિય ।
સાંખ્યાનાં બુદ્ધિયોગેન વૈધયોગેન કર્મિણામ્ ॥૨ ॥

અનારમ્ભેણ વૈધાનાં નિષ્ક્રિયઃ પુરુષો ભવેત્ ।
ન સિદ્ધિં યાતિ સંત્યાગાત્કેવલાત્કર્મણો નૃપ ॥૩ ॥

કદાચિદક્રિયઃ કોઽપિ ક્ષણં નૈવાવતિષ્ઠતે ।
અસ્વતન્ત્રઃ પ્રકૃતિજૈર્ગુણૈઃ કર્મ ચ કાર્યતે ॥૪ ॥

કર્મકારીન્દ્રિયગ્રામં નિયમ્યાસ્તે સ્મરન્પુમાન્ ।
તદ્ગોચરાન્મન્દચિત્તો ધિગાચારઃ સ ભાષ્યતે ॥૫ ॥

તદ્ગ્રામં સંનિયમ્યાદૌ મનસા કર્મ ચારભેત્ ।
ઇન્દ્રિયૈઃ કર્મયોગં યો વિતૃષ્ણઃ સ પરો નૃપ ॥૬ ॥

અકર્મણઃ શ્રેષ્ઠતમં કર્માનીહાકૃતં તુ યત્ ।
વર્ષ્મણઃ સ્થિતિરપ્યસ્યાકર્મણો નૈવ સેત્સ્યતિ ॥૭ ॥

અસમર્પ્ય નિબધ્યન્તે કર્મ તેન જના મયિ ।
કુર્વીત સતતં કર્માનાશોઽસઙ્ગો મદર્પણમ્ ॥૮ ॥

મદર્થે યાનિ કર્માણિ તાનિ બધ્નન્તિ ન ક્વચિત્ ।
સવાસનમિદં કર્મ બધ્નાતિ દેહિનં બલાત્ ॥૯ ॥

વર્ણાન્સૃષ્ટ્વાવદં ચાહં સયજ્ઞાંસ્તાન્પુરા પ્રિય ।
યજ્ઞેન ઋધ્યતામેષ કામદઃ કલ્પવૃક્ષવત્ ॥૧૦ ॥

સુરાંશ્ચાન્નેન પ્રીણધ્વં સુરાસ્તે પ્રીણયન્તુ વઃ ।
લભધ્વં પરમં સ્થાનમન્યોન્યપ્રીણનાત્સ્થિરમ્ ॥૧૧ ॥

ઇષ્ટા દેવાઃ પ્રદાસ્યન્તિ ભોગાનિષ્ટાન્સુતર્પિતાઃ ।
તૈર્દત્તાંસ્તાન્નરસ્તેભ્યોઽદત્વા ભુઙ્ક્તે સ તસ્કરઃ ॥૧૨ ॥

હુતાવશિષ્ટભોક્તારો મુક્તાઃ સ્યુઃ સર્વપાતકૈઃ ।
અદન્ત્યેનો મહાપાપા આત્મહેતોઃ પચન્તિ યે ॥૧૩ ॥

ઊર્જો ભવન્તિ ભૂતાનિ દેવાદન્નસ્ય સંભવઃ ।
યજ્ઞાચ્ચ દેવસંભૂતિસ્તદુત્પત્તિશ્ચ વૈધતઃ ॥૧૪ ॥

બ્રહ્મણો વૈધમુત્પન્નં મત્તો બ્રહ્મસમુદ્ભવઃ ।
અતો યજ્ઞે ચ વિશ્વસ્મિન્ સ્થિતં માં વિદ્ધિ ભૂમિપ ॥૧૫ ॥

સંસૃતીનાં મહાચક્રં ક્રામિતવ્યં વિચક્ષણૈઃ ।
સ મુદા પ્રીણતે ભૂપેન્દ્રિયક્રીડોઽધમો જનઃ ॥૧૬ ॥

અન્તરાત્મનિ યઃ પ્રીત આત્મારામોઽખિલપ્રિયઃ ।
આત્મતૃપ્તો નરો યઃ સ્યાત્તસ્યાર્થો નૈવ વિદ્યતે ॥૧૭
કાર્યાકાર્યકૃતીનાં સ નૈવાપ્નોતિ શુભાશુભે ।
કિંચિદસ્ય ન સાધ્યં સ્યાત્સર્વજન્તુષુ સર્વદા ॥૧૮ ॥

અતોઽસક્તતયા ભૂપ કર્તવ્યં કર્મ જન્તુભિઃ ।
સક્તોઽગતિમવાપ્નોતિ મામવાપ્નોતિ તાદૃશઃ ॥૧૯ ॥

પરમાં સિદ્ધિમાપન્નાઃ પુરા રાજર્ષયો દ્વિજાઃ ।

સંગ્રહાય હિ લોકાનાં તાદૃશં કર્મ ચારભેત્ ॥૨૦ ॥

શ્રેયાન્યત્કુરુતે કર્મ તત્કરોત્યખિલો જનઃ ।
મનુતે યત્પ્રમાણં સ તદેવાનુસરત્યસૌ ॥૨૧ ॥

વિષ્ટપે મે ન સાધ્યોઽસ્તિ કશ્ચિદર્થો નરાધિપ ।
અનાલબ્ધશ્ચ લબ્ધવ્યઃ કુર્વે કર્મ તથાપ્યહમ્ ॥૨૨ ॥

ન કુર્વેઽહં યદા કર્મ સ્વતન્ત્રોઽલસભાવિતઃ ।
કરિષ્યન્તિ મમ ધ્યાનં સર્વે વર્ણા મહામતે ॥૨૩ ॥

ભવિષ્યન્તિ તતો લોકા ઉચ્છિન્નાઃ સમ્પ્રદાયિનઃ ।
હંતા સ્યામસ્ય લોકસ્ય વિધાતા સંકરસ્ય ચ ॥૨૪ ॥

કામિનો હિ સદા કામૈરજ્ઞાનાત્કર્મકારિણઃ ।
લોકાનાં સંગ્રહાયૈતદ્વિદ્વાન્ કુર્યાદસક્તધીઃ ॥૨૫ ॥

વિભિન્નત્વમતિં જહ્યાદજ્ઞાનાં કર્મચારિણામ્
।ભાગાદ્ગુણક્રર્મ
યોગયુક્તઃ સર્વકર્માણ્યર્પયેન્મયિ કર્મકૃત્ ॥૨૬ ॥

અવિદ્યાગુણસાચિવ્યાત્કુર્વન્કર્માણ્યતન્દ્રિતઃ ।
અહંકારાદ્ભિન્નબુદ્ધિરહંકર્તેતિ યોઽબ્રવીત્ ॥૨૭ ॥

યસ્તુ વેત્ત્યાત્મનસ્તત્ત્વં વિભાગાદ્ગુણકર્મણોઃ ।
કરણં વિષયે વૃત્તમિતિ મત્વા ન સજ્જતે ॥૨૮ ॥

કુર્વન્તિ સફલં કર્મ ગુણૈસ્ત્રિભિર્વિમોહિતાઃ ।
અવિશ્વસ્તઃ સ્વાત્મદ્રુહો વિશ્વવિન્નૈવ લંઘયેત્ ॥૨૯ ॥

નિત્યં નૈમિત્તિકં તસ્માન્મયિ કર્માર્પયેદ્બુધઃ ।
ત્યક્ત્વાહંમમતાબુદ્ધિં પરાં ગતિમવાપ્નુયાત્ ॥૩૦ ॥

અનીર્ષ્યન્તો ભક્તિમન્તો યે મયોક્તમિદં શુભમ્ ।
અનુતિષ્ઠન્તિ યે સર્વે મુક્તાસ્તેઽખિલકર્મભિઃ ॥૩૧ ॥

યે ચૈવ નાનુતિષ્ઠન્તિ ત્વશુભા હતચેતસઃ ।
ઈર્ષ્યમાણાન્મહામૂઢાન્નષ્ટાંસ્તાન્વિદ્ધિ મે રિપૂન્ ॥૩૨ ॥

તુલ્યં પ્રકૃત્યા કુરુતે કર્મ યજ્જ્ઞાનવાનપિ ।
અનુયાતિ ચ તામેવાગ્રહસ્તત્ર મુધા મતઃ ॥૩૩ ॥

કામશ્ચૈવ તથા ક્રોધઃ ખાનામર્થેષુ જાયતે ।
નૈતયોર્વશ્યતાં યાયાદસ્યવિધ્વંસકૌ યતઃ ॥૩૪ ॥

શસ્તોઽગુણો નિજો ધર્મઃ સાંગાદન્યસ્ય ધર્મતઃ ।
નિજે તસ્મિન્મૃતિઃ શ્રેયોઽપરત્ર ભયદઃ પરઃ ॥૩૫ ॥

વરેણ્ય ઉવાચ -
પુમાન્યત્કુરુતે પાપં સ હિ કેન નિયુજ્યતે ।
અકાઙ્ક્ષન્નપિ હેરમ્બ પ્રેરિતઃ પ્રબલાદિવ ॥૩૬ ॥

શ્રીગજાનન ઉવાચ -
કામક્રોધૌ મહાપાપૌ ગુણદ્વયસમુદ્ભવૌ ।
નયન્તૌ વશ્યતાં લોકાન્ વિદ્ધ્યેતૌ દ્વેષિણૌ વરૌ ॥૩૭ ॥

આવૃણોતિ યથા માયા જગદ્બાષ્પો જલં યથા ।
વર્ષામેઘો યથા ભાનું તદ્વત્કામોઽખિલાંશ્ચ રુટ્ ॥૩૮ ॥

પ્રતિપત્તિમતો જ્ઞાનં છાદિતં સતતં દ્વિષા ।
ઇચ્છાત્મકેન તરસા દુષ્પોષ્યેણ ચ શુષ્મિણા ॥૩૯ ॥

આશ્રિત્ય બુદ્ધિમનસી ઇન્દ્રિયાણિ સ તિષ્ઠતિ ।
તૈરેવાચ્છાદિતપ્રજ્ઞો જ્ઞાનિનં મોહયત્યસૌ ॥૪૦ ॥

તસ્માન્નિયમ્ય તાન્યાદૌ સમનાંસિ નરો જયેત્ ।
જ્ઞાનવિજ્ઞાનયોઃ શાન્તિકરં પાપં મનોભવમ્ ॥૪૧ ॥

યતસ્તાનિ પરાણ્યાહુસ્તેભ્યશ્ચ પરમં મનઃ ।
તતોઽપિ હિ પરા બુદ્ધિરાત્મા બુદ્ધેઃ પરો મતઃ ॥૪૨ ॥

બુદ્ધ્વૈવમાત્મનાત્માનં સંસ્તભ્યાત્માનમાત્મના ।
હત્વા શત્રું કામરૂપં પરં પદમવાપ્નુયાત્ ॥૪૩ ॥

ઇતિ શ્રીમદ્ગણેશગીતાસૂપનિષદર્થગર્ભાસુ
યોગામૃતાર્થશાસ્ત્રે
શ્રીગણેશપુરાણે ઉત્તરખણ્ડે ગજાનનવરેણ્યસંવાદે
કર્મયોગો નામ દ્વિતીયોઽધ્યાયઃ ॥

3
॥ તૃતીયોઽધ્યાયઃ ॥

॥ વિજ્ઞાનપ્રતિપાદન ॥

શ્રીગજાનન ઉવાચ -
પુરા સર્ગાદિસમયે ત્રૈગુણ્યં ત્રિતનૂરુહમ્ ।
નિર્માય ચૈનમવદં વિષ્ણવે યોગમુત્તમમ્ ॥૧ ॥

અર્યમ્ણે સોઽબ્રવીત્સોઽપિ મનવે નિજસૂનવે ।

તતઃ પરમ્પરાયાતં વિદુરેનં મહર્ષયઃ ॥૨ ॥

કાલેન બહુના ચાયં નષ્ટઃ સ્યાચ્ચરમે યુગે ।
અશ્રદ્ધેયો હ્યવિશ્વાસ્યો વિગીતવ્યશ્ચ ભૂમિપ ॥૩ ॥

એવં પુરાતનં યોગં શ્રુતવાનસિ મન્મુખાત્ ।
ગુહ્યાદ્ગુહ્યતરં વેદરહસ્યં પરમં શુભમ્ ॥૪ ॥

વરેણ્ય ઉવાચ -
સાંપ્રતં ચાવતીર્ણોઽસિ ગર્ભતસ્ત્વં ગજાનન ।
પ્રોક્તવાન્કથમેતં ત્વં વિષ્ણવે યોગમુત્તમમ્ ॥૫ ॥

ગણેશ ઉવાચ -
અનેકાનિ ચ તે જન્માન્યતીતાનિ મમાપિ ચ ।
સંસ્મરે તાનિ સર્વાણિ ન સ્મૃતિસ્તવ વર્તતે ॥૬ ॥

મત્ત એવ મહાબાહો જાતા વિષ્ણ્વાદયઃ સુરાઃ ।
મય્યેવ ચ લયં યાન્તિ પ્રલયેષુ યુગે યુગે ॥૭ ॥

અહમેવ પરો બ્રહ્મ મહારુદ્રોઽહમેવ ચ ।
અહમેવ જગત્સર્વં સ્થાવરં જઙ્ગમં ચ યત્ ॥૮ ॥

અજોઽવ્યયોઽહં ભૂતાત્માઽનાદિરીશ્વર એવ ચ ।
આસ્થાય ત્રિગુણાં માયાં ભવામિ બહુયોનિષુ ॥૯ ॥

અધર્મોપચયો ધર્માપચયો હિ યદા ભવેત્ ।
સાધૂન્સંરક્ષિતું દુષ્ટાંસ્તાડિતું સંભવામ્યહમ્ ॥૧૦ ॥

ઉચ્છિદ્યાધર્મનિચયં ધર્મં સંસ્થાપયામિ ચ ।
હન્મિ દુષ્ટાંશ્ચ દૈત્યાંશ્ચ નાનાલીલાકરો મુદા ॥૧૧ ॥

વર્ણાશ્રમાન્મુનીન્સાધૂન્પાલયે બહુરૂપધૃક્ ।
એવં યો વેત્તિ સંભૂતિર્મમ દિવ્યા યુગે યુગે ॥૧૨ ॥

તત્તત્કર્મ ચ વીર્યં ચ મમ રૂપં સમાસતઃ ।
ત્યક્તાહંમમતાબુદ્ધિં ન પુનર્ભૂઃ સ જાયતે ॥૧૩ ॥

નિરીહા નિર્ભિયોરોષા મત્પરા મદ્વ્યપાશ્રયાઃ ।
વિજ્ઞાનતપસા શુદ્ધા અનેકે મામુપાગતાઃ ॥૧૪ ॥

યેન યેન હિ ભાવેન સંસેવન્તે નરોત્તમાઃ ।
તથા તથા ફલં તેભ્યઃ પ્રયચ્છામ્યવ્યયઃ સ્ફુટમ્ ॥૧૫ ॥

જનાઃ સ્યુરિતરે રાજન્મમ માર્ગાનુયાયિનઃ ।

તથૈવ વ્યવહારં તે સ્વેષુ ચાન્યેષુ કુર્વતે ॥૧૬ ॥

કુર્વન્તિ દેવતાપ્રીતિં કાઙ્ક્ષન્તઃ કર્મણાં ફલમ્ ।
પ્રાપ્નુબંતીહ તે લોકે શીઘ્રં સિદ્ધિં હિ કર્મજામ્ ॥૧૭ ॥

ચત્વારો હિ મયા વર્ણા રજઃસત્ત્વતમોંઽશતઃ ।
કર્માંશતશ્ચ સંસૃષ્ટા મૃત્યુલોકે મયાનઘ ॥૧૮ ॥

કર્તારમપિ તેષાં મામકર્તારં વિદુર્બુધાઃ ।
અનાદિમીશ્વરં નિત્યમલિપ્તં કર્મજૈર્ગુણૈઃ ॥૧૯ ॥

નિરીહં યોઽભિજાનાતિ કર્મ બધ્નાતિ નૈવ તમ્ ।
ચક્રુઃ કર્માણિ બુદ્ધ્યૈવં પૂર્વં પૂર્વં મુમુક્ષવઃ ॥૨૦ ॥

વાસનાસહિતાદાદ્યાત્સંસારકારણાદ્દૃઢાત્ ।
અજ્ઞાનબન્ધનાજ્જન્તુર્બુદ્ધ્વાયં મુચ્યતેઽખિલાત્ ॥૨૧ ॥

તદકર્મ ચ કર્માપિ કથયામ્યધુના તવ ।
યત્ર મૌનં ગતા મોહાદૃષયો બુદ્ધિશાલિનઃ ॥૨૨ ॥

તત્ત્વં મુમુક્ષુણા જ્ઞેયં કર્માકર્મવિકર્મણામ્ ।
ત્રિવિધાનીહ કર્માણિ સુનિમ્નૈષાં ગતિઃ પ્રિય ॥૨૩ ॥

ક્રિયાયામક્રિયાજ્ઞાનમક્રિયાયાં ક્રિયામતિઃ ।
યસ્ય સ્યાત્સ હિ મર્ત્યેઽસ્મિઁલ્લોકે મુક્તોઽખિલાર્થકૃત્ ॥૨૪ ॥

કર્માંકુરવિયોગેન યઃ કર્માણ્યારભેન્નરઃ ।
તત્ત્વદર્શનનિર્દગ્ધક્રિયમાહુર્બુધા બુધમ્ ॥૨૫ ॥

ફલતૃષ્ણાં વિહાય સ્યાત્સદા તૃપ્તો વિસાધનઃ ।
ઉદ્યુક્તોઽપિ ક્રિયાં કર્તું કિંચિન્નૈવ કરોતિ સઃ ॥૨૬ ॥

નિરીહો નિગૃહીતાત્મા પરિત્યક્તપરિગ્રહઃ ।
કેવલં વૈ ગૃહં કર્માચરન્નાયાતિ પાતકમ્ ॥૨૭ ॥

અદ્વન્દ્વોઽમત્સરો ભૂત્વા સિદ્ધ્યસિદ્ધ્યોઃ સમશ્ચ યઃ ।
યથાપ્રાપ્ત્યેહ સંતુષ્ટઃ કુર્વન્કર્મ ન બધ્યતે ॥૨૮ ॥

અખિલૈર્વિષયૈર્મુક્તો જ્ઞાનવિજ્ઞાનવાનપિ ।
યજ્ઞાર્થં તસ્ય સકલં કૃતં કર્મ વિલીયતે ॥૨૯ ॥

અહમગ્નિર્હવિર્હોતા હુતં યન્મયિ ચાર્પિતમ્ ।
બ્રહ્માપ્તવ્યં ચ તેનાથ બ્રહ્મણ્યેવ યતો રતઃ ॥૩૦ ॥

યોગિનઃ કેચિદપરે દિષ્ટં યજ્ઞં વદન્તિ ચ ।

બ્રહ્માગ્નિરેવ યજ્ઞો વૈ ઇતિ કેચન મેનિરે ॥૩૧ ॥

સંયમાગ્નૌ પરે ભૂપ ઇન્દ્રિયાણ્યુપજુહ્વતિ ।
ખાગ્નિષ્વન્યે તદ્વિષયાંશ્છબ્દાદીનુપજુહ્વતિ ॥૩૨ ॥

પ્રાણાનામિન્દ્રિયાણાં ચ પરે કર્માણિ કૃત્સ્નશઃ ।
નિજાત્મરતિરૂપેઽગ્નૌ જ્ઞાનદીપ્તે પ્રજુહ્વતિ ॥૩૩ ॥

દ્રવ્યેણ તપસા વાપિ સ્વાધ્યાયેનાપિ કેચન ।
તીવ્રવ્રતેન યતિનો જ્ઞાનેનાપિ યજન્તિ મામ્ ॥૩૪ ॥

પ્રાણેઽપાનં તથા પ્રાણમપાને પ્રક્ષિપન્તિ યે ।
રુદ્ધ્વા ગતીશ્ચોભયસ્તે પ્રાણાયામપરાયણાઃ ॥૩૫ ॥

જિત્વા પ્રાણાન્પ્રાણગતીરુપજુહ્વતિ તેષુ ચ ।
એવં નાનાયજ્ઞરતા યજ્ઞધ્વંસિતપાતકાઃ ॥૩૬ ॥

નિત્યં બ્રહ્મ પ્રયાન્ત્યેતે યજ્ઞશિષ્ટામૃતાશિનઃ ।
અયજ્ઞકારિણો લોકો નાયમન્યઃ કુતો ભવેત્ ॥૩૭ ॥

કાયિકાદિત્રિધાભૂતાન્યજ્ઞાન્વેદે પ્રતિષ્ઠિતાન્ ।
જ્ઞાત્વા તાનખિલાન્ભૂપ મોક્ષ્યસેઽખિલબન્ધનાત્ ॥૩૮ ॥

સર્વેષાં ભૂપ યજ્ઞાનાં જ્ઞાનયજ્ઞઃ પરો મતઃ ।
અખિલં લીયતે કર્મ જ્ઞાને મોક્ષસ્ય સાધને ॥૩૯ ॥

તજ્જ્ઞેયં પુરુષવ્યાઘ્ર પ્રશ્નેન નતિતઃ સતામ્ ।
શુશ્રૂષયા વદિષ્યન્તિ સંતસ્તત્ત્વવિશારદાઃ ॥૪૦ ॥

નાનાસંગાજ્ઞનઃ કુર્વન્નૈકં સાધુસમાગમમ્ ।
કરોતિ તેન સંસારે બન્ધનં સમુપૈતિ સઃ ॥૪૧ ॥

સત્સંગાદ્ગુણસંભૂતિરાપદાં લય એવ ચ ।
સ્વહિતં પ્રાપ્યતે સર્વૈરિહ લોકે પરત્ર ચ ॥૪૨ ॥

ઇતરત્સુલભં રાજન્સત્સંગોઽતીવ દુર્લભઃ ।
યજ્જ્ઞાત્વા પુનર્વેધમેતિ જ્ઞેયં તતસ્તતઃ ॥૪૩ ॥

તતઃ સર્વાણિ ભૂતાનિ સ્વાત્મન્યેવાભિપશ્યતિ ।
અતિપાપરતો જંતુસ્તતસ્તસ્માત્પ્રમુચ્યતે ॥૪૪ ॥

દ્વિવિધાન્યપિ કર્માણિ જ્ઞાનાગ્નિર્દહતિ ક્ષણાત્ ।
પ્રસિદ્ધોઽગ્નિર્યથા સર્વં ભસ્મતાં નયતિ ક્ષણાત્ ॥૪૫ ॥

ન જ્ઞાનસમતામેતિ પવિત્રમિતરન્નૃપ ।

આત્મન્યેવાવગચ્છન્તિ યોગાત્કાલેન યોગિનઃ ॥૪૬ ॥

ભક્તિમાનિન્દ્રિયજયી તત્પરો જ્ઞાનમાપ્નુયાત્ ।
લબ્ધ્વા તત્પરમં મોક્ષં સ્વલ્પકાલેન યાત્યસૌ ॥૪૭ ॥

ભક્તિહીનોઽશ્રદ્દધાનઃ સર્વત્ર સંશયી તુ યઃ ।
તસ્ય શં નાપિ વિજ્ઞાનમિહ લોકોઽથ વા પરઃ ॥૪૮ ॥

આત્મજ્ઞાનરતં જ્ઞાનનાશિતાખિલસંશયમ્ ।
યોગાસ્તાખિલકર્માણં બધ્નન્તિ ભૂપ તાનિ ન ॥૪૯ ॥

જ્ઞાનખડ્ગપ્રહારેણ સંભૂતામજ્ઞતાં બલાત્ ।
છિત્વાન્તઃસંશયં તસ્માદ્યોગયુક્તો ભવેન્નરઃ ॥૫૦ ॥

ઇતિ શ્રીમદ્ગણેશગીતાસૂપનિષદર્થગર્ભાસુ
યોગામૃતાર્થશાસ્ત્રે
શ્રીગણેશપુરાણે ઉત્તરખણ્ડે ગજાનનવરેણ્યસંવાદે
વિજ્ઞાનપ્રતિપાદનો નામ તૃતીયોઽધ્યાયઃ ॥

૪
॥ ચતુર્થોઽધ્યાયઃ ॥

॥ વૈધસંન્યાસયોગઃ ॥

વરેણ્ય ઉવાચ -
સંન્યસ્તિશ્ચૈવ યોગશ્ચ કર્મણાં વર્ણ્યતે ત્વયા ।
ઉભયોર્નિશ્ચિતં ત્વેકં શ્રેયો યદ્વદ મે પ્રભો ॥૧ ॥

શ્રીગજાનન ઉવાચ -
ક્રિયાયોગો વિયોગશ્ચાપ્યુભૌ મોક્ષસ્ય સાધને ।
તયોર્મધ્યે ક્રિયાયોગસ્ત્યાગાત્તસ્ય વિશિષ્યતે ॥૨ ॥

દ્વન્દ્વદુઃખસહોઽદ્વેષ્ટા યો ન કાઙ્ક્ષતિ કિંચન ।
મુચ્યતે બન્ધનાત્સદ્યો નિત્યં સંન્યાસવાન્સુખમ્ ॥૩ ॥

વદન્તિ ભિન્નફલકૌ કર્મણસ્ત્યાગસંગ્રહૌ ।
મૂઢાલ્પજ્ઞાસ્તયોરેકં સંયુઞ્જીત વિચક્ષણઃ ॥૪ ॥

યદેવ પ્રાપ્યતે ત્યાગાત્તદેવ યોગતઃ ફલમ્ ।
સંગ્રહં કર્મણો યોગં યો વિન્દતિ સ વિન્દતિ ॥૫ ॥

કેવલં કર્મણાં ન્યાસં સંન્યાસં ન વિદુર્બુધાઃ ।
કુર્વન્નનિચ્છયા કર્મ યોગી બ્રહ્મૈવ જાયતે ॥૬ ॥

નિર્મલો યતચિત્તાત્મા જિતખો યોગતત્પરઃ ।
આત્માનં સર્વભૂતસ્થં પશ્યન્કુર્વન્ન લિપ્યતે ॥૭ ॥

તત્ત્વવિદ્યોગયુક્તાત્મા કરોમીતિ ન મન્યતે ।
એકાદશાનીન્દ્રિયાણિ કુર્વન્તિ કર્મસંખ્યયા ॥૮ ॥

તત્સર્વમર્પયેદ્બ્રહ્મણ્યપિ કર્મ કરોતિ યઃ ।
ન લિપ્યતે પુણ્યપાપૈર્ભાનુર્જલગતો યથા ॥૯ ॥

કાયિકં વાચિકં બૌદ્ધમૈન્દ્રિયં માનસં તથા ।
ત્યક્ત્વાશાં કર્મ કુર્વન્તિ યોગજ્ઞાશ્ચિત્તશુદ્ધયે ॥૧૦ ॥

યોગહીનો નરઃ કર્મ ફલેહયા કરોત્યલમ્ ।
બધ્યતે કર્મબીજૈઃ સ તતો દુઃખં સમશ્નુતે ॥૧૧ ॥

મનસા સકલં કર્મ ત્યક્ત્વા યોગી સુખં વસેત્ ।
ન કુર્વન્કારયન્વાપિ નન્દન્સ્વભ્રે સુપત્તને ॥૧૨ ॥

ન ક્રિયા ન ચ કર્તૃત્વં કસ્ય ચિત્સૃજ્યતે મયા ।
ન ક્રિયાબીજસમ્પર્કઃ શક્ત્યા તત્ક્રિયતેઽખિલમ્ ॥૧૩ ॥

કસ્યચિત્પુણ્યપાપાનિ ન સ્પૃશામિ વિભુર્નૃપ ।
જ્ઞાનમૂઢા વિમુહ્યન્તે મોહેનાવૃતબુદ્ધયઃ ॥૧૪ ॥

વિવેકેનાત્મનોઽજ્ઞાનં યેષાં નાશિતમાત્મના ।
તેષાં વિકાશમાયાતિ જ્ઞાનમાદિત્યવત્પરમ્ ॥૧૫ ॥

મન્નિષ્ઠા મદ્ધિયોઽત્યન્તં મચ્ચિત્તા મયિ તત્પરાઃ ।
અપુનર્ભવમાયાન્તિ વિજ્ઞાનાન્નાશિતૈનસઃ ॥૧૬ ॥

જ્ઞાનવિજ્ઞાનસંયુક્તે દ્વિજે ગવિ ગજાદિષુ ।
સમેક્ષણા મહાત્માનઃ પણ્ડિતાઃ શ્વપચે શુનિ ॥૧૭ ॥

વશ્યઃ સ્વર્ગો જગત્તેષાં જીવન્મુક્તાઃ સમેક્ષણાઃ ।
યતોઽદોષં બ્રહ્મ સમં તસ્માત્તૈર્વિષયીકૃતમ્ ॥૧૮ ॥

પ્રિયાપ્રિયે પ્રાપ્ય હર્ષદ્વેષૌ યે પ્રાપ્નુવન્તિ ન ।
બ્રહ્માશ્રિતા અસંમૂઢા બ્રહ્મજ્ઞાઃ સમબુદ્ધયઃ ॥૧૯ ॥

વરેણ્ય ઉવાચ -
કિં સુખં ત્રિષુ લોકેષુ દેવગન્ધર્વયોનિષુ ।
ભગવન્કૃપયા તન્મે વદ વિદ્યાવિશારદ ॥૨૦ ॥

શ્રીગજાનન ઉવાચ -

આનન્દમશ્નુતેऽસક્તઃ સ્વાત્મારામો નિજાત્મનિ ।
અવિનાશિ સુખં તદ્ધિ ન સુખં વિષયાદિષુ ॥૨૧ ॥

વિષયોત્થાનિ સૌખ્યાનિ દુઃખાનાં તાનિ હેતવઃ ।
ઉત્પત્તિનાશયુક્તાનિ તત્રાસક્તો ન તત્ત્વવિત્ ॥૨૨ ॥

કારણે સતિ કામસ્ય ક્રોધસ્ય સહતે ચ યઃ ।
તૌ જેતું વર્ષ્મવિરહાત્સ સુખં ચિરમશ્નુતે ॥૨૩ ॥

અન્તર્નિષ્ઠોऽન્તઃપ્રકાશોऽન્તઃસુખોऽન્તારતિર્લભેત્ ।
અસંદિગ્ધોऽક્ષયં બ્રહ્મ સર્વભૂતહિતાર્થકૃત્ ॥૨૪ ॥

જેતારઃ ષડ્રિપૂણાં યે શમિનો દમિનસ્તથા ।
તેષાં સમન્તતો બ્રહ્મ સ્વાત્મજ્ઞાનાં વિભાત્યહો ॥૨૫ ॥

આસનેષુ સમાસીનસ્ત્યક્ત્વેમાન્વિષયાન્બહિઃ ।
સંસ્તભ્ય ભ્રુકુટીમાસ્તે પ્રાણાયામપરાયણઃ ॥૨૬ ॥

પ્રાણાયામં તુ સંરોધં પ્રાણાપાનસમુદ્ભવમ્ ।
વદન્તિ મુનયસ્તં ચ ત્રિધાભૂતં વિપશ્ચિતઃ ॥૨૭ ॥

પ્રમાણં ભેદતો વિદ્ધિ લઘુમધ્યમમુત્તમમ્ ।
દશભિર્દ્વ્યધિકૈર્વર્ણૈઃ પ્રાણાયામો લઘુઃ સ્મૃતઃ ॥૨૮ ॥

ચતુર્વિંશત્યક્ષરો યો મધ્યમઃ સ ઉદાહૃતઃ ।
ષટ્ત્રિંશલ્લઘુવર્ણો ય ઉત્તમઃ સોऽભિધીયતે ॥૨૯ ॥

સિંહં શાર્દૂલકં વાપિ મત્તેભં મૃદુતાં યથા ।
નયન્તિ પ્રાણિનસ્તદ્વત્પ્રાણાપાનૌ સુસાધયેત્ ॥૩૦ ॥

પીડયન્તિ મૃગાસ્તે ન લોકાન્વશ્યં ગતા નૃપ ।
દહત્યેનસ્તથા વાયુઃ સંસ્તબ્ધો ન ચ તત્તનુમ્ ॥૩૧ ॥

યથા યથા નરઃ કશ્ચિત્સોપાનાવલિમાક્રમેત્ ।
તથા તથા વશીકુર્યાત્પ્રાણાપાનૌ હિ યોગવિત્ ॥૩૨ ॥

પૂરકં કુમ્ભકં ચૈવ રેચકં ચ તતોऽભ્યસેત્ ।
અતીતાનાગતજ્ઞાની તતઃ સ્યાજ્જગતીતલે ॥૩૩ ॥

પ્રાણાયામૈર્દ્વાદશભિરુત્તમૈર્ધારણા મતા ।
યોગસ્તુ ધારણે દ્વે સ્યાદ્યોગીશસ્તે સદાભ્યસેત્ ॥૩૪ ॥

એવં યઃ કુરુતે રાજંસ્ત્રિકાલજ્ઞઃ સ જાયતે ।
અનાયાસેન તસ્ય સ્યાદ્વશ્યં લોકત્રયં નૃપ ॥૩૫ ॥

બ્રહ્મરૂપં જગત્સર્વં પશ્યતિ સ્વાન્તરાત્મનિ ।
એવં યોગશ્ચ સંન્યાસઃ સમાનફલદાયિનૌ ॥૩૬ ॥

જન્તૂનાં હિતકર્તારં કર્મણાં ફલદાયિનમ્ ।
માં જ્ઞાત્વા મુક્તિમાપ્નોતિ ત્રૈલોક્યસ્યેશ્વરં વિભુમ્ ॥૩૭ ॥

ઇતિ શ્રીમદ્ગણેશગીતાસૂપનિષદર્થગર્ભાસુ
યોગામૃતાર્થશાસ્ત્રે
શ્રીગણેશપુરાણે ઉત્તરખણ્ડે ગજાનનવરેણ્યસંવાદે
વૈધસંન્યાસયોગો નામ ચતુર્થોઽધ્યાયઃ ॥

૫
॥ પઞ્ચમોઽધ્યાયઃ ॥

॥ યોગાવૃત્તિપ્રશંસનઃ ॥

શ્રીગજાનન ઉવાચ -
શ્રૌતસ્માર્તાનિ કર્માણિ ફલં નેચ્છન્સમાચરેત્ ।
શસ્તઃ સ યોગી રાજેન્દ્ર અક્રિયાદ્યોગમાશ્રિતાત્ ॥૧ ॥

યોગપ્રાપ્ત્યૈ મહાબાહો હેતુઃ કર્મૈવ મે મતમ્ ।
સિદ્ધિયોગસ્ય સંસિદ્ધ્યૈ હેતૂ શમદમૌ મતૌ ॥૨ ॥

ઇન્દ્રિયાર્થાંશ્ચ સંકલ્પ્ય કુર્વન્સ્વસ્ય રિપુર્ભવેત્ ।
એતાનનિચ્છન્યઃ કુર્વન્સિદ્ધિં યોગી સ સિદ્ધ્યતિ ॥૩ ॥

સુહૃત્વે ચ રિપુત્વે ચ ઉદ્ધારે ચૈવ બન્ધને ।
આત્મનૈવાત્મનિ હ્યાત્મા નાત્મા ભવતિ કશ્ચન ॥૪ ॥

માનેઽપમાને દુઃખે ચ સુખેઽસુહૃદિ સાધુષુ ।
મિત્રેઽમિત્રેઽપ્યુદાસીને દ્વેષ્યે લોષ્ઠે ચ કાઞ્ચને ॥૫ ॥

સમો જિતાત્મા વિજ્ઞાની જ્ઞાનીન્દ્રિયજયાવહઃ ।
અભ્યસેત્સતતં યોગં યદા યુક્તતમો હિ સઃ ॥૬ ॥

તપ્તઃ શ્રાન્તો વ્યાકુલો વા ક્ષુધિતો વ્યગ્રચિત્તકઃ ।
કાલેઽતિશીતેઽત્યુષ્ણે વાનિલાગ્ન્યમ્બુસમાકુલે ॥૭ ॥

સધ્વનાવતિજીર્ણે ગોઃસ્થાને સાગ્નૌ જલાન્તિકે ।
કૂપકૂલે શ્મશાને ચ નદ્યાં ભિત્તૌ ચ મર્મરે ॥૮ ॥

ચૈત્યે સવલ્મિકે દેશે પિશાચાદિસમાવૃતે ।
નાભ્યસેદ્યોગવિદ્યોગં યોગધ્યાનપરાયણઃ ॥૯ ॥

સ્મૃતિલોપશ્ચ મૂકત્વં બાધિર્યં મન્દતા જ્વરઃ ।
જડતા જાયતે સદ્યો દોષાજ્ઞાનાદ્ધિ યોગિનઃ ॥૧૦ ॥

એતે દોષાઃ પરિત્યાજ્યા યોગાભ્યસનશાલિના ।
અનાદરે હિ ચૈતેષાં સ્મૃતિલોપાદયો ધ્રુવમ્ ॥૧૧ ॥

નાતિભુઞ્જન્સદા યોગી નાભુઞ્જન્નાતિનિદ્રિતઃ ।
નાતિજાગ્રત્સિદ્ધિમેતિ ભૂપ યોગં સદાભ્યસન્ ॥૧૨ ॥

સંકલ્પજાંસ્ત્યજેત્કામાન્નિયતાહારજાગરઃ ।
નિયમ્ય ખગણં બુદ્ધ્યા વિરમેત શનૈઃ શનૈઃ ॥૧૩ ॥

તતસ્તતઃ કૃષેદેતદ્યત્ર યત્રાનુગચ્છતિ ।
ધૃત્યાત્મવશગં કુર્યાચ્ચિત્તં ચઞ્ચલમાદૃતઃ ॥૧૪ ॥

એવં કુર્વન્સદા યોગી પરાં નિર્વૃતિમૃચ્છતિ ।
વિશ્વસ્મિન્નિજમાત્માનં વિશ્વં ચ સ્વાત્મનીક્ષતે ॥૧૫ ॥

યોગેન યો મામુપૈતિ તમુપૈમ્યહમાદરાત્ ।
મોચયામિ ન મુઞ્ચામિ તમહં માં સ ન ત્યજેત્ ॥૧૬ ॥

સુખે સુખેતરે દ્વેષે ક્ષુધિ તોષે સમસ્તૃષિ ।
આત્મસામ્યેન ભૂતાનિ સર્વગં માં ચ વેત્તિ યઃ ॥૧૭ ॥

જીવન્મુક્તઃ સ યોગીન્દ્રઃ કેવલં મયિ સંગતઃ ।
બ્રહ્માદીનાં ચ દેવાનાં સ વન્દ્યઃ સ્યાજ્જગત્રયે ॥૧૮ ॥

વરેણ્ય ઉવાચ -
દ્વિવિધોઽપિ હિ યોગોઽયમસંભાવ્યો હિ મે મતઃ ।
યતોઽન્તઃકરણં દુષ્ટં ચઞ્ચલં દુર્ગ્રહં વિભો ॥૧૯ ॥

શ્રીગજાનન ઉવાચ -
યો નિગ્રહં દુર્ગ્રહસ્ય મનસઃ સમ્પ્રકલ્પયેત્ ।
ઘટીયન્ત્રસમાદસ્માન્મુક્તઃ સંસૃતિચક્રકાત્ ॥૨૦ ॥

વિષયૈઃ ક્રકચૈરેતત્સંસૃષ્ટં ચક્રકં દૃઢમ્ ।
જનશ્છેત્તું ન શક્નોતિ કર્મકીલઃ સુસંવૃતમ્ ॥૨૧ ॥

અતિદુઃખં ચ વૈરાગ્યં ભોગાદ્વૈતૃષ્ણ્યમેવ ચ ।
ગુરુપ્રસાદઃ સત્સઙ્ગ ઉપાયાસ્તજ્જયે અમી ॥૨૨ ॥

અભ્યાસાદ્વા વશીકુર્યાન્મનો યોગસ્ય સિદ્ધયે ।
વરેણ્ય દુર્લભો યોગો વિનાસ્ય મનસો જયાત્ ॥૨૩ ॥

વરેણ્ય ઉવાચ -
યોગભ્રષ્ટસ્ય કો લોકઃ કા ગતિઃ કિં ફલં ભવેત્ ।
વિભો સર્વજ્ઞ મે છિન્ધિ સંશયં બુદ્ધિચક્રભૃત્ ॥૨૪ ॥

શ્રીગજાનન ઉવાચ -
દિવ્યદેહધરો યોગાદ્ભ્રષ્ટઃ સ્વર્ભોગમુત્તમમ્ ।
ભુક્ત્વા યોગિકુલે જન્મ લભેચ્છુદ્ધિમતાં કુલે ॥૨૫ ॥

પુનર્યોગી ભવત્યેષ સંસ્કારાત્પૂર્વકર્મજાત્ ।
ન હિ પુણ્યકૃતાં કશ્ચિન્નરકં પ્રતિપદ્યતે ॥૨૬ ॥

જ્ઞાનનિષ્ઠાત્તપોનિષ્ઠાત્કર્મનિષ્ઠાન્નરાધિપ ।
શ્રેષ્ઠો યોગી શ્રેષ્ઠતમો ભક્તિમાન્મયિ તેષુ યઃ ॥૨૭ ॥

ઇતિ શ્રીમદ્ગણેશગીતાસૂપનિષદર્થગર્ભાસુ
યોગામૃતાર્થશાસ્ત્રે
શ્રીગણેશપુરાણે ઉત્તરખણ્ડે ગજાનનવરેણ્યસંવાદે
યોગાવૃત્તિપ્રશંસનો નામ પઞ્ચમોઽધ્યાયઃ ॥

૬
## ॥ ષષ્ઠોઽધ્યાયઃ ॥

॥ બુદ્ધિયોગઃ ॥

શ્રીગજાનન ઉવાચ -
ઈદૃશં વિદ્ધિ મે તત્ત્વં મદ્ગતેનાન્તરાત્મના ।
યજ્જ્ઞાત્વા મામસન્દિગ્ધં વેત્સિ મોક્ષ્યસિ સર્વગમ્ ॥૧ ॥

તત્તેઽહં શૃણુ વક્ષ્યામિ લોકાનાં હિતકામ્યયા ।
અસ્તિ જ્ઞેયં યતો નાન્યન્મુક્તેશ્ચ સાધનં નૃપ ॥૨ ॥

જ્ઞેયા મત્પ્રકૃતિઃ પૂર્વં તતઃ સ્યાં જ્ઞાનગોચરઃ ।
તતો વિજ્ઞાનસમ્પત્તિર્મયિ જ્ઞાતે નૃણાં ભવેત્ ॥૩ ॥

ક્ષ્વનલૌ ખમહઙ્કારઃ કં ચિત્તં ધીસમીરણૌ ।
રવીન્દૂ યાગકૃચ્ચૈકાદશધા પ્રકૃતિર્મમ ॥૪ ॥

અન્યાં મત્પ્રકૃતિં વૃદ્ધા મુનયઃ સંગિરન્તિ ચ ।
તથા ત્રિવિષ્ટપં વ્યાપ્તં જીવત્વં ગતયાનયા ॥૫ ॥

આભ્યામુત્પાદ્યતે સર્વં ચરાચરમયં જગત્ ।
સંગાદ્વિશ્વસ્ય સંભૂતિઃ પરિત્રાણં લયોઽપ્યહમ્ ॥૬ ॥

તત્ત્વમેતન્નિબોદ્ધું મે યતતે કશ્ચિદેવ હિ ।

વર્ણાશ્રમવતાં પુંસાં પુરા ચીર્ણેન કર્મણા ॥૭ ॥

સાક્ષાત્કરોતિ માં કશ્ચિદ્યત્નવત્સ્વપિ તેષુ ચ ।
મત્તોऽન્યન્નેક્ષતે કિંચિન્મયિ સર્વં ચ વીક્ષતે ॥૮ ॥

ક્ષિતૌ સુગન્ધરૂપેણ તેજોરૂપેણ ચાગ્નિષુ ।
પ્રભારૂપેણ પૂષ્ણ્યબ્જે રસરૂપેણ ચાપ્સુ ચ ॥૯ ॥

ધીતપોબલિનાં ચાહં ધીસ્તપોબલમેવ ચ ।
ત્રિવિધેષુ વિકારેષુ મદુત્પન્નેષ્વહં સ્થિતઃ ॥૧૦ ॥

ન માં વિન્દતિ પાપીયાન્માયામોહિતચેતનઃ ।
ત્રિવિકારા મોહયતિ પ્રકૃતિર્મે જગત્ત્રયમ્ ॥૧૧ ॥

યો મે તત્ત્વં વિજાનાતિ મોહં ત્યજતિ સોऽખિલમ્ ।
અનેકૈર્જન્મભિશ્ચૈવં જ્ઞાત્વા માં મુચ્યતે તતઃ ॥૧૨ ॥

અન્યે નાનાવિધાન્દેવાન્ભજન્તે તાન્વ્રજન્તિ તે ।
યથા યથા મતિં કૃત્વા ભજતે માં જનોऽખિલઃ ॥૧૩ ॥

તથા તથાસ્ય તં ભાવં પૂરયામ્યહમેવ તમ્ ।
અહં સર્વં વિજાનામિ માં ન કશ્ચિદ્વિબુધ્યતે ॥૧૪ ॥

અવ્યક્તં વ્યક્તિમાપન્નં ન વિદુઃ કામમોહિતાઃ ।
નાહં પ્રકાશતાં યામિ અજ્ઞાનાં પાપકર્મણામ્ ॥૧૫ ॥

યઃ સ્મૃત્વા ત્યજતિ પ્રાણમન્તે માં શ્રદ્ધયાન્વિતઃ ।
સ યાત્યપુનરાવૃત્તિં પ્રસાદાન્મમ ભૂભુજ ॥૧૬ ॥

યં યં દેવં સ્મરન્ભક્ત્યા ત્યજતિ સ્વં કલેવરમ્ ।
તત્તત્સાલોક્યમાયાતિ તત્તદ્ભક્ત્યા નરાધિપ ॥૧૭ ॥

અતશ્ચાહર્નિશં ભૂપ સ્મર્તવ્યોऽનેકરૂપવાન્ ।
સર્વેષામપ્યહં ગમ્યઃ સ્રોતસામર્ણવો યથા ॥૧૮ ॥

બ્રહ્મવિષ્ણુશિવેન્દ્રાદ્યાઁલ્લોકાન્પ્રાપ્ય પુનઃ પતેત્ ।
યો મામુપૈત્યસંદિગ્ધઃ પતનં તસ્ય ન ક્વચિત્ ॥૧૯ ॥

અનન્યશરણો યો માં ભક્ત્યા ભજતિ ભૂમિપ ।
યોગક્ષેમૌ ચ તસ્યાહં સર્વદા પ્રતિપાદયે ॥૨૦ ॥

દ્વિવિધા ગતિરુદ્દિષ્ટા શુક્લા કૃષ્ણા નૃણાં નૃપ ।
એકયા પરમં બ્રહ્મ પરયા યાતિ સંસૃતિમ્ ॥૨૧ ॥

ઇતિ શ્રીમદ્ગણેશગીતાસૂપનિષદર્થગર્ભાસુ

યોગામૃતાર્થશાસ્ત્રે
શ્રીગણેશપુરાણે ઉત્તરખણ્ડે ગજાનનવરેણ્યસંવાદે
બુદ્ધિયોગો નામ ષષ્ઠોઽધ્યાયઃ ॥

૭
॥ સપ્તમોઽધ્યાયઃ ॥

॥ ઉપાસના યોગઃ ॥

વરેણ્ય ઉવાચ -
કા શુક્લા ગતિરુદ્દિષ્ટા કા ચ કૃષ્ણા ગજાનન ।
કિં બ્રહ્મ સંસૃતિઃ કા મે વક્તુમર્હસ્યનુગ્રહાત્ ॥૧ ॥

શ્રીગજાનન ઉવાચ -
અગ્નિર્જ્યોતિરહઃ શુક્લા કર્માર્હમયનં ગતિઃ ।
ચાન્દ્રં જ્યોતિસ્તથા ધૂમો રાત્રિશ્ચ દક્ષિણાયનમ્ ॥૨ ॥

કૃષ્ણૈતે બ્રહ્મસંસૃત્યોરવાપ્તેઃ કારણં ગતી ।
દૃશ્યાદૃશ્યમિદં સર્વં બ્રહ્મૈવેત્યવધારય ॥૩ ॥

ક્ષરં પઞ્ચાત્મકં વિદ્ધિ તદન્તરક્ષરં સ્મૃતમ્ ।
ઉભાભ્યાં યદતિક્રાન્તં શુદ્ધં વિદ્ધિ સનાતનમ્ ॥૪ ॥

અનેકજન્મસંભૂતિઃ સંસૃતિઃ પરિકીર્તિતા ।
સંસૃતિં પ્રાપ્નુવન્ત્યેતે યે તુ માં ગણયન્તિ ન ॥૫ ॥

યે માં સમ્યગુપાસન્તે પરં બ્રહ્મ પ્રયાન્તિ તે ।
ધ્યાનાદ્યૈરુપચારૈર્માં તથા પઞ્ચામૃતાદિભિઃ ॥૬ ॥

સ્નાનવસ્ત્રાદ્યલંકારસુગન્ધધૂપદીપકૈઃ ।
નૈવેદ્યૈઃ ફલતાંબૂલૈર્દક્ષિણાભિશ્ચ યોઽર્ચયેત્ ॥૭ ॥

ભક્ત્યૈકચેતસા ચૈવ તસ્યેષ્ટં પૂરયામ્યહમ્ ।
એવં પ્રતિદિનં ભક્ત્યા મદ્ભક્તો માં સમર્ચયેત્ ॥૮ ॥

અથવા માનસીં પૂજાં કુર્વીત સ્થિરચેતસા ।
અથવા ફલપત્રાદ્યૈઃ પુષ્પમૂલજલાદિભિઃ ॥૯ ॥

પૂજયેન્માં પ્રયત્નેન તત્તદિષ્ટં ફલં લભેત્ ।
ત્રિવિધાસ્વપિ પૂજાસુ શ્રેયસી માનસી મતા ॥૧૦ ॥

સાપ્યુત્તમા મતા પૂજાનિચ્છયા યા કૃતા મમ ।
બ્રહ્મચારી ગૃહસ્થો વા વાનપ્રસ્થો યતિશ્ચ યઃ ॥૧૧ ॥

એકાં પૂજાં પ્રકુર્વાણોઽપ્યન્યો વા સિદ્ધિમૃચ્છતિ ।
મદન્યદેવં યો ભક્ત્યા દ્વિષન્મામન્યદેવતામ્ ॥૧૨ ॥

સોઽપિ મામેવ યજતે પરં ત્વવિધિતો નૃપ ।
યો હ્યન્યદેવતાં માં ચ દ્વિષન્નન્યાં સમર્ચયેત્ ॥૧૩ ॥

યાતિ કલ્પસહસ્રં સ નિરયાન્દુઃખભાક્ સદા ।
ભૂતશુદ્ધિં વિધાયાદૌ પ્રાણાનાં સ્થાપનં તતઃ ॥૧૪ ॥

આકૃષ્ય ચેતસો વૃત્તિં તતો ન્યાસં ઉપક્રમેત્ ।
કૃત્વાન્તર્માતૃકાન્યાસં બહિશ્ચાથ ષડઙ્ગકમ્ ॥૧૫ ॥

ન્યાસં ચ મૂલમન્ત્રસ્ય તતો ધ્યાત્વા જપેન્મનુમ્ ।
સ્થિરચિત્તો જપેન્મન્ત્રં યથા ગુરુમુખાગતમ્ ॥૧૬ ॥

જપં નિવેદ્ય દેવાય સ્તુત્વા સ્તોત્રૈરનેકધા ।
એવં માં ય ઉપાસીત સ લભેન્મોક્ષમવ્યયમ્ ॥૧૭ ॥

ય ઉપાસનયા હીનો ધિઙ્નરો વ્યર્થજન્મભાક્ ।
યજ્ઞોઽહમૌષધં મન્ત્રોઽગ્નિરાજ્યં ચ હવિર્હુતમ્ ॥૧૮ ॥

ધ્યાનં ધ્યેયં સ્તુતિં સ્તોત્રં નતિર્ભક્તિરુપાસના ।
ત્રયીજ્ઞેયં પવિત્રં ચ પિતામહપિતામહઃ ॥૧૯ ॥

ૐકારઃ પાવનઃ સાક્ષી પ્રભુર્મિત્રં ગતિર્લયઃ ।
ઉત્પત્તિઃ પોષકો બીજં શરણં વાસ એવ ચ ॥૨૦ ॥

અસન્મૃત્યુઃ સદમૃતમાત્મા બ્રહ્માહમેવ ચ ।
દાનં હોમસ્તપો ભક્તિર્જપઃ સ્વાધ્યાય એવ ચ ॥૨૧ ॥

યદ્યત્કરોતિ તત્સર્વં સ મે મયિ નિવેદયેત્ ।
યોષિતોઽથ દુરાચારાઃ પાપાસ્ત્રૈવર્ણિકાસ્તથા ॥૨૨ ॥

મદાશ્રયા વિમુચ્યન્તે કિં મદ્ભક્ત્યા દ્વિજાદયઃ ।
ન વિનશ્યતિ મદ્ભક્તો જ્ઞાત્વેમા મદ્વિભૂતયઃ ॥૨૩ ॥

પ્રભવં મે વિભૂતિશ્ચ ન દેવા ઋષયો વિદુઃ ।
નાનાવિભૂતિભિરહં વ્યાપ્ય વિશ્વં પ્રતિષ્ઠિતઃ ॥૨૪ ॥

યદ્યચ્છ્રેષ્ઠતમં લોકે સ વિભૂતિર્નિબોધ મે ॥૨૫ ॥

ઇતિ શ્રીમદ્ગણેશગીતાસૂપનિષદર્થગર્ભાસુ
યોગામૃતાર્થશાસ્ત્રે
શ્રીગણેશપુરાણે ઉત્તરખણ્ડે ગજાનનવરેણ્યસંવાદે

ઉપાસનાયોગો નામ સપ્તમોઽધ્યાયઃ ॥

૮

॥ અષ્ટમોઽધ્યાયઃ ॥

॥ વિશ્વરૂપદર્શન ॥

વરેણ્ય ઉવાચ -
ભગવન્નારદો મહ્યં તવ નાના વિભૂતયઃ ।
ઉક્તવાંસ્તા અહં વેદ ન સર્વાઃ સોઽપિ વેત્તિ તાઃ ॥૧ ॥

ત્વમેવ તત્ત્વતઃ સર્વા વેત્સિ તા દ્વિરદાનન ।
નિજં રૂપમિદાનીં મે વ્યાપકં ચારુ દર્શય ॥૨ ॥

શ્રીગજાનન ઉવાચ -
એકસ્મિન્મયિ પશ્ય ત્વં વિશ્વમેતચ્ચરાચરમ્ ।
નાનાશ્ચર્યાણિ દિવ્યાનિ પુરાઽદૃષ્ટાનિ કેનચિત્ ॥૩ ॥

જ્ઞાનચક્ષુરહં તેઽદ્ય સૃજામિ સ્વપ્રભાવતઃ ।
ચર્મચક્ષુઃ કથં પશ્યેન્માં વિભું હ્યજમવ્યયમ્ ॥૪ ॥

ક ઉવાચ -
તતો રાજા વરેણ્યઃ સ દિવ્યચક્ષુરવૈક્ષત ।
ઈશિતુઃ પરમં રૂપં ગજાસ્યસ્ય મહાદ્ભુતમ્ ॥૫ ॥

અસંખ્યવક્ત્રં લલિતમસંખ્યાંઘ્રિકરં મહત્ ।
અનુલિપ્તં સુગન્ધેન દિવ્યભૂષામ્બરસ્રજમ્ ॥૬ ॥

અસંખ્યનયનં કોટિસૂર્યરશ્મિધૃતાયુધમ્ ।
તદ્બર્ષ્મણિ ત્રયો લોકા દૃષ્ટાસ્તેન પૃથગ્વિધાઃ ॥૭ ॥

દૃષ્ટ્વૈશ્વરં પરં રૂપં પ્રણમ્ય સ નૃપોઽબ્રવીત્ ।
વરેણ્ય ઉવાચ -
વીક્ષેઽહં તવ દેહેઽસ્મિન્દેવાનૃષિગણાન્પિતૄન્ ॥૮ ॥

પાતાલાનાં સમુદ્રાણાં દ્વીપાનાં ચૈવ ભૂભૃતામ્ ।
મહર્ષીણાં સપ્તકં ચ નાનાર્થૈઃ સંકુલં વિભો ॥૯ ॥

ભુવોઽન્તરિક્ષસ્વર્ગાંશ્ચ મનુષ્યોરગરાક્ષસાન્ ।
બ્રહ્માવિષ્ણુમહેશેન્દ્રાન્દેવાન્જન્તૂનનેકધા ॥૧૦ ॥

અનાદ્યનન્તં લોકાદિમનન્તભુજશીર્ષકમ્ ।
પ્રદીપ્તાનલસંકાશમપ્રમેયં પુરાતનમ્ ॥૧૧ ॥

કિરીટકુણ્ડલધરં દુર્નિરીક્ષ્યં મુદાવહમ્ ।
એતાદૃશં ચ વીક્ષે ત્વાં વિશાલવક્ષસં પ્રભુમ્ ॥૧૨ ॥

સુરવિદ્યાધરૈર્યક્ષૈઃ કિન્નરૈર્મુનિમાનુષૈઃ ।
નૃત્યદ્ભિરપ્સરોભિશ્ચ ગન્ધર્વૈર્ગાનતત્પરૈઃ ॥૧૩ ॥

વસુરુદ્રાદિત્યગણૈઃ સિદ્ધૈઃ સાધ્યૈર્મુદા યુતૈઃ ।
સેવ્યમાનં મહાભક્ત્યા વીક્ષ્યમાણં સુવિસ્મિતૈઃ ॥૧૪ ॥

વેત્તારમક્ષરં વેદ્યં ધર્મગોપ્તારમીશ્વરમ્ ।
પાતાલાનિ દિશઃ સ્વર્ગાન્ભુવં વ્યાપ્યાઽખિલં સ્થિતમ્ ॥૧૫ ॥

ભીતા લોકાસ્તથા ચાહમેવં ત્વાં વીક્ષ્ય રૂપિણમ્ ।
નાનાદંષ્ટ્રાકરાલં ચ નાનાવિદ્યાવિશારદમ્ ॥૧૬ ॥

પ્રલયાનલદીપ્તાસ્યં જટિલં ચ નભઃસ્પૃશમ્ ।
દૃષ્ટ્વા ગણેશ તે રૂપમહં ભ્રાન્ત ઇવાભવમ્ ॥૧૭ ॥

દેવા મનુષ્યનાગાદ્યાઃ ખલાસ્ત્વદુદરેશયાઃ ।
નાનાયોનિભુજશ્ચાન્તે ત્વય્યેવ પ્રવિશન્તિ ચ ॥૧૮ ॥

અબ્ધેરુત્પદ્યમાનાસ્તે યથાજીમૂતબિન્દવઃ ।
ત્વમિન્દ્રોઽગ્નિર્યમશ્ચૈવ નિરૃતિર્વરુણો મરુત્ ॥૧૯ ॥

ગુહ્યકેશસ્તથેશાનઃ સોમઃ સૂર્યોઽખિલં જગત્ ।
નમામિ ત્વામતઃ સ્વામિન્પ્રસાદં કુરુ મેઽધુના ॥૨૦ ॥

દર્શયસ્વ નિજં રૂપં સૌમ્યં યત્પૂર્વમીક્ષિતમ્ ।
કો વેદ લીલાસ્તે ભૂમન્ ક્રિયમાણા નિજેચ્છયા ॥૨૧ ॥

અનુગ્રહાન્મયા દૃષ્ટમૈશ્વરં રૂપમીદૃશમ્ ।
જ્ઞાનચક્ષુર્યતો દત્તં પ્રસન્નેન ત્વયા મમ ॥૨૨ ॥

શ્રીગજાનન ઉવાચ -
નેદં રૂપં મહાબાહો મમ પશ્યન્ત્યયોગિનઃ ।
સનકાદ્યા નારદાદ્યાઃ પશ્યન્તિ મદનુગ્રહાત્ ॥ ૨૩ ॥

ચતુર્વેદાર્થતત્ત્વજ્ઞાઃ સર્વશાસ્ત્રવિશારદાઃ ।
યજ્ઞદાનતપોનિષ્ઠા ન મે રૂપં વિદન્તિ તે ॥૨૪ ॥

શક્યોઽહં વીક્ષિતું જ્ઞાતું પ્રવેષ્ટું ભક્તિભાવતઃ ।
ત્યજ ભીતિં ચ મોહં ચ પશ્ય માં સૌમ્યરૂપિણમ્ ॥૨૫ ॥

મદ્ભક્તો મત્પરઃ સર્વસંગહીનો મદર્થકૃત્ ।

નિષ્ક્રોધઃ સર્વભૂતેષુ સમો મામેતિ ભૂભુજ ॥૨૬ ॥

ઇતિ શ્રીમદ્ગણેશગીતાસૂપનિષદર્થગર્ભાસુ
યોગામૃતાર્થશાસ્ત્રે
શ્રીગણેશપુરાણે ઉત્તરખણ્ડે ગજાનનવરેણ્યસંવાદે
વિશ્વરૂપદર્શનો નામાષ્ટમોऽધ્યાયઃ ॥

૯
## ॥ નવમોऽધ્યાયઃ ॥

॥ ક્ષેત્રજ્ઞાતૃજ્ઞેયવિવેકયોગઃ ॥

વરેણ્ય ઉવાચ -
અનન્યભાવસ્ત્વાં સમ્યઙ્મૂર્તિમન્તમુપાસતે ।
યોऽક્ષરં પરમવ્યક્તં તયોઃ કસ્તે મતોऽધિકઃ ॥૧ ॥

અસિ ત્વં સર્વવિત્સાક્ષી ભૂતભાવન ઈશ્વરઃ ।
અતસ્ત્વાં પરિપૃચ્છામિ વદ મે કૃપયા વિભો ॥૨ ॥

શ્રીગજાનન ઉવાચ -
યો માં મૂર્તિધરં ભક્ત્યા મદ્ભક્તઃ પરિસેવતે ।
સ મે માન્યોऽનન્યભક્તિર્નિયુજ્ય હૃદયં મયિ ॥૩ ॥

ખગણં સ્વવશં કૃત્વાખિલભૂતહિતાર્થકૃત્ ।
ધ્યેયમક્ષરમવ્યક્તં સર્વગં કૂટગં સ્થિરમ્ ॥૪ ॥

સોऽપિ મામેત્યનિર્દેશ્યં મત્પરો ય ઉપાસતે ।
સંસારસાગરાદસ્માદુદ્ધરામિ તમપ્યહમ્ ॥૫ ॥

અવ્યક્તોપાસનાદ્દુઃખમધિકં તેન લભ્યતે ।
વ્યક્તસ્યોપાસનાત્સાધ્યં તદેવાવ્યક્તભક્તિતઃ ॥૬ ॥

ભક્તિશ્ચૈવાદરશ્ચાત્ર કારણં પરમં મતમ્ ।
સર્વેષાં વિદુષાં શ્રેષ્ઠો હ્યકિંચિજ્જ્ઞોऽપિ ભક્તિમાન્ ॥૭ ॥

ભજન્ભક્ત્યા વિહીનો યઃ સ ચાણ્ડાલોऽભિધીયતે ।
ચાણ્ડાલોऽપિ ભજન્ભક્ત્યા બ્રાહ્મણેભ્યોऽધિકો મતઃ ॥૮ ॥

શુકાદ્યાઃ સનકાદ્યાશ્ચ પુરા મુક્તા હિ ભક્તિતઃ ।
ભક્ત્યૈવ મામનુપ્રાપ્તા નારદાદ્યાશ્ચિરાયુષઃ ॥૯ ॥

અતો ભક્ત્યા મયિ મનો વિધેહિ બુદ્ધિમેવ ચ ।
ભક્ત્યા યજસ્વ માં રાજંસ્તતો મામેવ યાસ્યસિ ॥૧૦ ॥

અસમર્થોઽર્પિતું સ્વાન્તં એવં મયિ નરાધિપ ।
અભ્યાસેન ચ યોગેન તતો ગન્તું યતસ્વ મામ્ ॥૧૧ ॥

તત્રાપિ ત્વમશક્તશ્ચેત્કુરુ કર્મ મદર્પણમ્ ।
મામનુગ્રહતશ્ચૈવં પરાં નિર્વૃતિમેષ્યસિ ॥૧૨ ॥

અથૈતદપ્યનુષ્ઠાતું ન શક્તોઽસિ તદા કુરુ ।
પ્રયત્નતઃ ફલત્યાગં ત્રિવિધાનાં હિ કર્મણામ્ ॥૧૩ ॥

શ્રેયસી બુદ્ધિરાવૃત્તેસ્તતો ધ્યાનં પરં મતમ્ ।
તતોઽખિલપરિત્યાગસ્તતઃ શાન્તિર્ગરીયસી ॥૧૪ ॥

નિરહંમમતાબુદ્ધિરદ્વેષઃ શરણઃ સમઃ ।
લાભાલાભે સુખે દુઃખે માનામાને સ મે પ્રિયઃ ॥૧૫ ॥

યં વીક્ષ્ય ન ભયં યાતિ જનસ્તસ્માન્ન ચ સ્વયમ્ ।
ઉદ્વેગભીઃ કોપમુદ્ભીરહિતો યઃ સ મે પ્રિયઃ ॥૧૬ ॥

રિપૌ મિત્રેઽથ ગર્હાયાં સ્તુતૌ શોકે સમઃ સમુત્ ।
મૌની નિશ્ચલધીભક્તિરસંગઃ સ ચ મે પ્રિયઃ ॥૧૭ ॥

સંશીલયતિ યશ્ચૈનમુપદેશં મયા કૃતમ્ ।
સ વન્દ્યઃ સર્વલોકેષુ મુક્તાત્મા મે પ્રિયઃ સદા ॥૧૮ ॥

અનિષ્ટાપ્તૌ ચ ન દ્વેષ્ટીષ્ટપ્રાપ્તૌ ચ ન તુષ્યતિ ।
ક્ષેત્રતજ્જ્ઞૌ ચ યો વેત્તિ સમે પ્રિયતમો ભવેત્ ॥૧૯ ॥

વરેણ્ય ઉવાચ -
કિં ક્ષેત્રં કશ્ચ તદ્વેત્તિ કિં તજ્જ્ઞાનં ગજાનન ।
એતદાચક્ષ્વ મહ્યં ત્વં પૃચ્છતે કરુણામ્બુધે ॥૨૦ ॥

શ્રીગજાનન ઉવાચ -
પઞ્ચ ભૂતાનિ તન્માત્રાઃ પઞ્ચ કર્મેન્દ્રિયાણિ ચ ।
અહંકારો મનો બુદ્ધિઃ પઞ્ચ જ્ઞાનેન્દ્રિયાણિ ચ ॥૨૧ ॥

ઇચ્છાવ્યક્તં ધૃતિદ્વેષૌ સુખદુઃખે તથૈવ ચ ।
ચેતનાસહિતશ્ચાયં સમૂહઃ ક્ષેત્રમુચ્યતે ॥૨૨ ॥

તજ્જ્ઞં ત્વં વિદ્ધિ માં ભૂપ સર્વાન્તર્યામિણં વિભુમ્ ।
અયં સમૂહોઽહં ચાપિ યજ્જ્ઞાનવિષયૌ નૃપ ॥૨૩ ॥

આર્જવં ગુરુશુશ્રૂષા વિરક્તિશ્ચેન્દ્રિયાર્થતઃ ।
શૌચં ક્ષાન્તિરદમ્ભશ્ચ જન્માદિદોષવીક્ષણમ્ ॥૨૪ ॥

સમદૃષ્ટિર્દૃઢા ભક્તિરેકાન્તિત્વં શમો દમઃ ।
એતૈર્યચ્ચ યુતં જ્ઞાનં તજ્જ્ઞાનં વિદ્ધિ બાહુજ ॥૨૫ ॥

તજ્જ્ઞાનવિષયં રાજન્બ્રવીમિ ત્વં શૃણુષ્વ મે ।
યજ્જ્ઞાત્વૈતિ ચ નિર્વાણં મુક્ત્વા સંસૃતિસાગરમ્ ॥૨૬ ॥

યદનાદીન્દ્રિયૈર્હીનં ગુણભુગ્ગુણવર્જિતમ્ ।
અવ્યક્તં સદસદ્ભિન્નમિન્દ્રિયાર્થાવભાસકમ્ ॥ ૨૭ ॥

વિશ્વભૃચ્ચાખિલવ્યાપિ ત્વેકં નાનેવ ભાસતે ।
બાહ્યાભ્યન્તરતઃ પૂર્ણમસંગં તમસઃ પરમ્ ॥૨૮ ॥

દુર્જ્ઞેયં ચાતિસૂક્ષ્મત્વાદ્દીપ્તાનામપિ ભાસકમ્ ।
જ્ઞેયમેતાદૃશં વિદ્ધિ જ્ઞાનગમ્યં પુરાતનમ્ ॥૨૯ ॥

એતદેવ પરં બ્રહ્મ જ્ઞેયમાત્મા પરોઽવ્યયઃ ।
ગુણાન્પ્રકૃતિજાન્ભુઙ્ક્તે પુરુષઃ પ્રકૃતેઃ પરઃ ॥૩૦ ॥

ગુણૈસ્ત્રિભિરિયં દેહે બધ્નાતિ પુરુષં દૃઢમ્ ।
યદા પ્રકાશઃ શાન્તિશ્ચ વૃદ્ધે સત્ત્વં તદાધિકમ્ ॥૩૧ ॥

લોભોઽશમઃ સ્પૃહારમ્ભઃ કર્મણાં રજસો ગુણઃ ।
મોહોઽપ્રવૃત્તિશ્ચાજ્ઞાનં પ્રમાદસ્તમસો ગુણઃ ॥૩૨ ॥

સત્ત્વાધિકઃ સુખં જ્ઞાનં કર્મસંગં રજોઽધિકઃ ।
તમોઽધિકશ્ચ લભતે નિદ્રાલસ્યં સુખેતરત્ ॥૩૩ ॥

એષુ ત્રિષુ પ્રવૃદ્ધેષુ મુક્તિસંસૃતિદુર્ગતીઃ ।
પ્રયાન્તિ માનવા રાજંસ્તસ્માત્સત્ત્વયુતો ભવ ॥૩૪ ॥

તતશ્ચ સર્વભાવેન ભજ ત્વં માં નરેશ્વર ।
ભક્ત્યા ચાવ્યભિચારિણ્યા સર્વત્રૈવ ચ સંસ્થિતમ્ ॥૩૫ ॥

અગ્નૌ સૂર્યે તથા સોમે યચ્ચ તારાસુ સંસ્થિતમ્ ।
વિદુષિ બ્રાહ્મણે તેજો વિદ્ધિ તન્મામકં નૃપ ॥૩૬ ॥

અહમેવાખિલં વિશ્વં સૃજામિ વિસૃજામિ ચ ।
ઔષધીસ્તેજસા સર્વા વિશ્વં ચાપ્યાયયામ્યહમ્ ॥૩૭ ॥

સર્વેન્દ્રિયાણ્યધિષ્ઠાય જાઠરં ચ ધનંજયમ્ ।
ભુનજ્મિ ચાખિલાન્ભોગાન્પુણ્યપાપવિવર્જિતઃ ॥૩૮ ॥

અહં વિષ્ણુશ્ચ રુદ્રશ્ચ બ્રહ્મા ગૌરી ગણેશ્વરઃ ।
ઇન્દ્રાદ્યા લોકપાલાશ્ચ મમૈવાંશસમુદ્ભવાઃ ॥૩૯ ॥

યેન યેન હિ રૂપેણ જનો માં પર્યુપાસતે ।
તથા તથા દર્શયામિ તસ્મૈ રૂપં સુભક્તિતઃ ॥૪૦ ॥

ઇતિ ક્ષેત્રં તથા જ્ઞાતા જ્ઞાનં જ્ઞેયં મયેરિતમ્ ।
અખિલં ભૂપતે સમ્યગુપપન્નાય પૃચ્છતે ॥૪૧ ॥

ઇતિ શ્રીમદ્ગણેશગીતાસૂપનિષદર્થગર્ભાસુ
યોગામૃતાર્થશાસ્ત્રે
શ્રીગણેશપુરાણે ઉત્તરખણ્ડે ગજાનનવરેણ્યસંવાદે
ક્ષેત્રજ્ઞાતૃજ્ઞેયવિવેકયોગો નામ નવમોઽધ્યાયઃ ॥

૧૦
॥ દશમોઽધ્યાયઃ ॥

॥ ઉપદેશયોગઃ ॥

શ્રીગજાનન ઉવાચ -
દૈવ્યાસુરી રાક્ષસી ચ પ્રકૃતિસ્ત્રિવિધા નૃણામ્ ।
તાસાં ફલાનિ ચિન્હાનિ સંક્ષેપાત્તેઽધુના બ્રુવે ॥૧ ॥

આદ્યા સંસાધયેન્મુક્તિં દ્વે પરે બન્ધનં નૃપ ।
ચિન્હં બ્રવીમિ ચાદ્યાયાસ્તન્મે નિગદતઃ શૃણુ ॥૨ ॥

અપૈશૂન્યં દયાઽક્રોધશ્ચાપલ્યં ધૃતિરાર્જવમ્ ।
તેજોઽભયમહિંસા ચ ક્ષમા શૌચમમાનિતા ॥૩ ॥

ઇત્યાદિ ચિન્હમાદ્યાયા આસુર્યાઃ શૃણુ સાંપ્રતમ્ ।
અતિવાદોઽભિમાનશ્ચ દર્પો જ્ઞાનં સકોપતા ॥૪ ॥

આસુર્યા એવમાદ્યાનિ ચિન્હાનિ પ્રકૃતેર્નૃપ ।
નિષ્ઠુરત્વં મદો મોહોઽહંકારો ગર્વ એવ ચ ॥૫ ॥

દ્વેષો હિંસાઽદયા ક્રોધ ઔદ્ધત્યં દુર્વિનીતતા ।
આભિચારિકકર્તૃત્વં ક્રૂરકર્મરતિસ્તથા ॥૬ ॥

અવિશ્વાસઃ સતાં વાક્યેઽશુચિત્વં કર્મહીનતા ।
નિન્દકત્વં ચ વેદાનાં ભક્તાનામસુરદ્વિષામ્ ॥૭ ॥

મુનિશ્રોત્રિયવિપ્રાણાં તથા સ્મૃતિપુરાણયોઃ ।
પાખણ્ડવાક્યે વિશ્વાસઃ સંગતિર્મલિનાત્મનામ્ ॥૮ ॥

સદમ્ભકર્મકર્તૃત્વં સ્પૃહા ચ પરવસ્તુષુ ।
અનેકકામનાવત્ત્વં સર્વદાઽનૃતભાષણમ્ ॥૯ ॥

પરોત્કર્ષાસહિષ્ણુત્વં પરકૃત્યપરાહતિઃ ।
ઇત્યાદ્યા બહવશ્ચાન્યે રાક્ષસ્યાઃ પ્રકૃતેર્ગુણાઃ ॥૧૦ ॥

પૃથિવ્યાં સ્વર્ગલોકે ચ પરિવૃત્ય વસન્તિ તે ।
મદ્ભક્તિરહિતા લોકા રાક્ષસીં પ્રકૃતિં શ્રિતાઃ ॥૧૧ ॥

તામસીં યે શ્રિતા રાજન્યાન્તિ તે રૌરવં ધ્રુવમ્ ।
અનિર્વાચ્યં ચ તે દુઃખં ભુઞ્જતે તત્ર સંસ્થિતાઃ ॥૧૨ ।
દૈવાન્નિઃસૃત્ય નરકાજ્જાયન્તે ભુવિ કુબ્જકાઃ ।
જાત્યન્ધાઃ પઙ્ગવો દીના હીનજાતિષુ તે નૃપ ॥૧૩ ॥

પુનઃ પાપસમાચારા મય્યભક્તાઃ પતન્તિ તે ।
ઉત્પતન્તિ હિ મદ્ભક્તા યાં કાંચિદ્યોનિમાશ્રિતાઃ ॥૧૪ ॥

લભન્તે સ્વર્ગતિં યજ્ઞૈરન્યૈર્ધર્મૈશ્ચ ભૂમિપ ।
સુલભાસ્તાઃ સકામાનાં મયિ ભક્તિઃ સુદુર્લભા ॥૧૫ ॥

વિમૂઢા મોહજાલેન બદ્ધાઃ સ્વેન ચ કર્મણા ।
અહં હન્તા અહં કર્તા અહં ભોક્તેતિ વાદિનઃ ॥૧૬ ॥

અહમેવેશ્વરઃ શાસ્તા અહં વેત્તા અહં સુખી ।
એતાદૃશી મતિર્નૃણામધઃ પાતયતીહ તાન્ ॥૧૭ ॥

તસ્માદેતત્સમુત્સૃજ્ય દૈવીં પ્રકૃતિમાશ્રય ।
ભક્તિં કુરુ મદીયાં ત્વમનિશં દૃઢચેતસા ॥૧૮ ॥

સાપિ ભક્તિસ્ત્રિધા રાજન્સાત્ત્વિકી રાજસીતરા ।
યદ્દેવાન્ભજતે ભક્ત્યા સાત્ત્વિકી સા મતા શુભા ॥૧૯ ॥

રાજસી સા તુ વિજ્ઞેયા ભક્તિર્જન્મમૃતિપ્રદા ।
યદ્યક્ષાંશ્ચૈવ રક્ષાંસિ યજન્તે સર્વભાવતઃ ॥૨૦ ॥

વેદેનાવિહિતં ક્રૂરં સાહંકારં સદમ્ભકમ્ ।
ભજન્તે પ્રેતભૂતાદીન્કર્મ કુર્વન્તિ કામુકમ્ ॥૨૧ ॥

શોષયન્તો નિજં દેહમન્તઃસ્થં માં દૃઢાગ્રહાઃ ।
તામસ્યેતાદૃશી ભક્તિર્નૃણાં સા નિરયપ્રદા ॥૨૨ ॥

કામો લોભસ્તથા ક્રોધો દમ્ભશ્ચત્વાર ઇત્યમી ।
મહાદ્વારાણિ વીચીનાં તસ્માદેતાંસ્તુ વર્જયેત્ ॥૨૩ ॥

ઇતિ શ્રીમદ્ગણેશગીતાસૂપનિષદર્થગર્ભાસુ
યોગામૃતાર્થશાસ્ત્રે

શ્રીગણેશપુરાણે ઉત્તરખણ્ડે ગજાનનવરેણ્યસંવાદે
ઉપદેશયોગો નામ દશમોऽધ્યાયઃ ॥

૧૧
॥ એકાદશોऽધ્યાયઃ ॥

॥ ત્રિવિધવસ્તુવિવેકનિરૂપણમ્ ॥

શ્રીગજાનન ઉવાચ -
તપોऽપિ ત્રિવિધં રાજન્કાયિકાદિપ્રભેદતઃ ।
ઋજુતાર્જવશૌચાનિ બ્રહ્મચર્યમહિંસનમ્ ॥૧ ॥

ગુરુવિજ્ઞદ્વિજાતીનાં પૂજનં ચાસુરદ્વિષામ્ ।
સ્વધર્મપાલનં નિત્યં કાયિકં તપ ઈદૃશમ્ ॥૨ ॥

મર્માસ્પૃક્ચ પ્રિયં વાક્યમનુદ્વેગં હિતં ઋતમ્ ।
અધીતિર્વેદશાસ્ત્રાણાં વાચિકં તપ ઈદૃશમ્ ॥૩ ॥

અન્તઃપ્રસાદઃ શાન્તત્વં મૌનમિન્દ્રિયનિગ્રહઃ ।
નિર્મલાશયતા નિત્યં માનસં તપ ઈદૃશમ્ ॥૪ ॥

અકામતઃ શ્રદ્ધયા ચ યત્તપઃ સાત્ત્વિકં ચ તત્ ।
ઋધ્યૈ સત્કારપૂજાર્થં સદમ્ભં રાજસં તપઃ ॥૫ ॥

તદસ્થિરં જન્મમૃતી પ્રયચ્છતિ ન સંશયઃ ।
પરાત્મપીડકં યચ્ચ તપસ્તામસમુચ્યતે ॥૬ ॥

વિધિવાક્યપ્રમાણાર્થં સત્પાત્રે દેશકાલતઃ ।
શ્રદ્ધયા દીયમાનં યદ્દાનં તત્સાત્ત્વિકં મતમ્ ॥૭ ॥

ઉપકારં ફલં વાપિ કાङ્ક્ષિદ્ભિર્દીયતે નરૈઃ ।
ક્લેશતો દીયમાનં વા ભક્ત્યા રાજસમુચ્યતે ॥૮ ॥

અકાલદેશતોऽપાત્રેऽવજ્ઞયા દીયતે તુ યત્ ।
અસત્કારાચ્ચ યદ્દત્તં તદ્દાનં તામસં સ્મૃતમ્ ॥૯ ॥

જ્ઞાનં ચ ત્રિવિધં રાજન્ શૃણુષ્વ સ્થિરચેતસા ।
ત્રિધા કર્મ ચ કર્તારં બ્રવીમિ તે પ્રસંગતઃ ॥૧૦ ॥

નાનાવિધેષુ ભૂતેષુ મામેકં વીક્ષતે તુ યઃ ।
નાશવત્સુ ચ નિત્યં માં તજ્જ્ઞાનં સાત્વિકં નૃપ ॥૧૧ ॥

તેષુ વેત્તિ પૃથગ્ભૂતં વિવિધં ભાવમાશ્રિતઃ ।
મામવ્યયં ચ તજ્જ્ઞાનં રાજસં પરિકીર્તિતમ્ ॥૧૨ ॥

હેતુહીનમસત્યં ચ દેહાત્મવિષયં ચ યત્ ।
અસદલ્પાર્થવિષયં તામસં જ્ઞાનમુચ્યતે ॥૧૩ ॥

ભેદતસ્ત્રિવિધં કર્મ વિદ્ધિ રાજન્મયેરિતમ્ ।
કામનાદ્વેષદમ્ભૈર્યદ્રહિતં નિત્યકર્મ યત્ ॥૧૪ ॥

કૃતં વિના ફલેચ્છાં યત્કર્મ સાત્ત્વિકમુચ્યતે ।
યદ્બહુક્લેશતઃ કર્મ કૃતં યચ્ચ ફલેચ્છયા ॥૧૫ ॥

ક્રિયમાણં નૃભિર્દમ્ભાત્કર્મ રાજસમુચ્યતે ।
અનપેક્ષ્ય સ્વશક્તિં યદર્થક્ષયકરં ચ યત્ ॥૧૬ ॥

અજ્ઞાનાત્ક્રિયમાણં યત્કર્મ તામસમીરિતમ્ ।
કર્તારં ત્રિવિધં વિદ્ધિ કથ્યમાનં મયા નૃપ ॥૧૭ ॥

ધૈર્યોત્સાહી સમોઽસિદ્ધૌ સિદ્ધૌ ચાવિક્રિયસ્તુ યઃ ।
અહંકારવિમુક્તો યઃ સ કર્તા સાત્ત્વિકો નૃપ ॥૧૮ ॥

કુર્વન્હર્ષં ચ શોકં ચ હિંસાં ફલસ્પૃહાં ચ યઃ ।
અશુચિર્લુબ્ધકો યશ્ચ રાજસોઽસૌ નિગદ્યતે ॥૧૯ ॥

પ્રમાદાજ્ઞાનસહિતઃ પરોચ્છેદપરઃ શઠઃ ।
અલસસ્તર્કવાન્યસ્તુ કર્તાસૌ તામસો મતઃ ॥૨૦ ॥

સુખં ચ ત્રિવિધં રાજન્દુઃખં ચ ક્રમતઃ શૃણુ ।
સાત્ત્વિકં રાજસં ચૈવ તામસં ચ મયોચ્યતે ॥૨૧ ॥

વિષવદ્ભાસતે પૂર્વં દુઃખસ્યાન્તકરં ચ યત્ ।
ઇષ્યમાનં તથાઽઽવૃત્ત્યા યદન્તેઽમૃતવદ્ભવેત્ ॥૨૨ ॥

પ્રસાદાત્સ્વસ્ય બુદ્ધેર્યત્સાત્ત્વિકં સુખમીરિતમ્ ।
વિષયાણાં તુ યો ભોગો ભાસતેઽમૃતવત્પુરા ॥૨૩ ॥

હાલાહલમિવાન્તે યદ્રાજસં સુખમીરિતમ્ ।
તન્દ્રિપ્રમાદસંભૂતમાલસ્યપ્રભવં ચ યત્ ॥૨૪ ॥

સર્વદા મોહકં સ્વસ્ય સુખં તામસમીદૃશમ્ ।
ન તદસ્તિ યદેતૈર્યન્મુક્તં સ્યાત્ત્રિવિધૈર્ગુણૈઃ ॥૨૫ ॥

રાજન્બ્રહ્માપિ ત્રિવિધમોંતત્સદિતિ ભેદતઃ ।
ત્રિલોકેષુ ત્રિધા ભૂતમખિલં ભૂપ વર્તતે ॥૨૬ ॥

બ્રહ્મક્ષત્રિયવિટ્શૂદ્રાઃ સ્વભાવાદ્ભિન્નકર્મિણઃ ।
તાનિ તેષાં તુ કર્માણિ સંક્ષેપાત્તેઽધુના વદે ॥૨૭ ॥

અન્તર્બાહ્યેન્દ્રિયાણાં ચ વશ્યત્વમાર્જવં ક્ષમા ।
નાનાતપાંસિ શૌચં ચ દ્વિવિધં જ્ઞાનમાત્મનઃ ॥૨૮ ॥

વેદશાસ્ત્રપુરાણાનાં સ્મૃતીનાં જ્ઞાનમેવ ચ ।
અનુષ્ઠાનં તદર્થાનાં કર્મ બ્રાહ્મમુદાહૃતમ્ ॥૨૯ ॥

દાર્ઢ્યં શૌર્યં ચ દાક્ષ્યં ચ યુદ્ધે પૃષ્ઠાપ્રદર્શનમ્ ।
શરણ્યપાલનં દાનં ધૃતિસ્તેજઃ સ્વભાવજમ્ ॥૩૦ ॥

પ્રભુતા મન ઔનત્યં સુનીતિર્લોકપાલનમ્ ।
પઞ્ચકર્માધિકારિત્વં ક્ષાત્રં કર્મ સમીરિતમ્ ॥૩૧ ॥

નાનાવસ્તુક્રયો ભૂમેઃ કર્ષણં રક્ષણં ગવામ્ ।
ત્રિધા કર્માધિકારિત્વં વૈશ્યકર્મ સમીરિતમ્ ॥૩૨ ॥

દાનં દ્વિજાનાં શુશ્રૂષા સર્વદા શિવસેવનમ્ ।
એતાદૃશં નરવ્યાઘ્ર કર્મ શૌદ્રમુદીરિતમ્ ॥૩૩ ॥

સ્વસ્વકર્મરતા એતે મય્યર્પ્યાખિલકારિણઃ ।
મત્પ્રસાદાત્સ્થિરં સ્થાનં યાન્તિ તે પરમં નૃપ ॥ ૩૪॥

ઇતિ તે કથિતો રાજન્પ્રસાદાદ્યોગૌત્તમઃ ।
સાંગોપાંગઃ સવિસ્તારોઽનાદિસિદ્ધો મયા પ્રિય ॥ ૩૫ ॥

યુઙ્ક્ષ્વ યોગં મયાખ્યાતં નાખ્યાતં કસ્યચિન્નૃપ ।
ગોપયૈનં તતઃ સિદ્ધિં પરાં યાસ્યસ્યનુત્તમામ્ ॥૩૬ ॥

વ્યાસ ઉવાચ -
ઇતિ તસ્ય વચઃ શ્રુત્વા પ્રસન્નસ્ય મહાત્મનઃ ।
ગણેશસ્ય વરેણ્યઃ સ ચકાર ચ યથોદિતમ્ ॥૩૭ ॥

ત્યક્ત્વા રાજ્યં કુટુમ્બં ચ કાન્તારં પ્રયયૌ રયાત્ ।
ઉપદિષ્ટં યથા યોગમાસ્થાય મુક્તિમાપ્નવાન્ ॥૩૮ ॥

ઇમં ગોપ્યતમં યોગં શૃણોતિ શ્રદ્ધયા તુ યઃ ।
સોઽપિ કૈવલ્યમાપ્નોતિ યથા યોગી તથૈવ સઃ ॥૩૯ ॥

ય ઇમં શ્રાવયેદ્યોગં કૃત્વા સ્વાર્થં સુબુદ્ધિમાન્ ।
યથા યોગી તથા સોઽપિ પરં નિર્વાણમૃચ્છતિ ॥૪૦ ॥

યો ગીતાં સમ્યગભ્યસ્ય જ્ઞાત્વા ચાર્થં ગુરોર્મુખાત્ ।
કૃત્વા પૂજાં ગણેશસ્ય પ્રત્યહં પઠતે તુ યઃ ॥૪૧ ॥

એકકાલં દ્વિકાલં વા ત્રિકાલં વાપિ યઃ પઠેત્ ।

બ્રહ્મીભૂતસ્ય તસ્યાપિ દર્શનાન્મુચ્યતે નરઃ ॥૪૨ ॥

ન યજ્ઞૈર્ન વ્રતૈર્દાનૈર્નાગ્નિહોત્રૈર્મહાધનૈઃ ।
ન વેદૈઃ સમ્યગભ્યસ્તૈઃ સહાઙ્ગૈઃ ॥૪૩ ॥

પુરાણશ્રવણૈર્નૈવ ન શાસ્ત્રૈઃ સાધુચિન્તિતૈઃ ।
પ્રાપ્યતે બ્રહ્મ પરમમનયા પ્રાપ્યતે નરૈઃ ॥૪૪ ॥

બ્રહ્મઘ્નો મદ્યપઃ સ્તેયી ગુરુતલ્પગમોઽપિ યઃ ।
ચતુર્ણાં યસ્તુ સંસર્ગી મહાપાતકકારિણામ્ ॥૪૫ ॥

સ્ત્રીહિંસાગોવધાદીનાં કર્તારો યે ચ પાપિનઃ ।
તે સર્વે પ્રતિમુચ્યન્તે ગીતામેતાં પઠન્તિ ચેત્ ॥૪૬ ॥

યઃ પઠેત્પ્રયતો નિત્યં સ ગણેશો ન સંશયઃ ।
ચતુર્થ્યાં યઃ પઠેદ્ભક્ત્યા સોઽપિ મોક્ષાય કલ્પતે ॥૪૭ ॥

તત્તત્ક્ષેત્રં સમાસાદ્ય સ્નાત્વાભ્યર્ચ્ય ગજાનનમ્ ।
સકૃદ્ગીતાં પઠન્ભક્ત્યા બ્રહ્મભૂયાય કલ્પતે ॥૪૮ ॥

ભાદ્રે માસે સિતે પક્ષે ચતુર્થ્યાં ભક્તિમાન્નરઃ ।
કૃત્વા મહીમયીં મૂર્તિં ગણેશસ્ય ચતુર્ભુજામ્ ॥૪૯ ॥

સવાહનાં સાયુધાં ચ સમભ્યર્ચ્ય યથાવિધિ ।
યઃ પઠેત્સપ્તકૃત્વસ્તુ ગીતામેતાં પ્રયત્નતઃ ॥૫૦ ॥

દદાતિ તસ્ય સન્તુષ્ટો ગણેશો ભોગમુત્તમમ્ ।
પુત્રાન્પૌત્રાન્ધનં ધાન્યં પશુરત્નાદિસમ્પદઃ ॥૫૧ ॥

વિદ્યાર્થિનો ભવેદ્વિદ્યા સુખાર્થી સુખમાપ્નુયાત્ ।
કામાનન્યાઁલ્લભેત્કામી મુક્તિમન્તે પ્રયાન્તિ તે ॥૫૨ ॥

ઇતિ શ્રીમદ્ગણેશગીતાસૂપનિષદર્થગર્ભાસુ
યોગામૃતાર્થશાસ્ત્રે
શ્રીગણેશપુરાણે ઉત્તરખણ્ડે ગજાનનવરેણ્યસંવાદે
ત્રિવિધવસ્તુવિવેકનિરૂપણં નામ એકાદશોઽધ્યાયઃ ॥

॥ ઇતિ ગણેશ ગીતા સમાપ્તા ॥

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com

.. shrIGanesha Gita ..
was typeset on August 2, 2016

Please send corrections to sanskrit@cheerful.com